A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M RANGACHARYA, M A, RAO BAHADUR,

CURATOR, GOVERNMENT ORIENTAL MSS LIBRARY; AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. II—VEDIC LITERATURE

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1905.

CONTENTS.

CLASS I.—VEDIC LITERATURE

III.—(1) VĒDALAKṢAṆA (ŚIKṢĀ AND CHANDAS)

III.—(1) VEDALAKṢAṆA (ŚIKṢĀ AND CHANDAS)—*continued*

iii.—(1) VĒDALAKṢAṆA (ŚIKṢĀ AND CHANDAS)—*continued*

(2) NIRUKTAM

(3) JYAUTIṢAM (VĒDĀṄGA)

iv.—KALPA AND THE ALLIED SŪTRAS

IV.—KALPA AND THE ALLIED SŪTRAS—*continued*

iv.—KALPA AND THE ALLIED SŪTRAS—*continued*

iv.—KALPA AND THE ALLIED SŪTRAS—*continued*

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS,

VOLUME II.

CLASS I.—VEDIC LITERATURE.

iii. (1) Vēdalaksana (Śiksa and Chandas).

No 853 अनिङ्ग्यम्

ANINGYAM

Substance, palm leaf Size, 8¼ × 1¼ inches Pages 29 Lines, 6 on a page Character, Grantha Condition, slightly injured Appearance, old

Begins on fol 24*b* The other works herein are—Saṁhitāsa mānam 1*a*, Vilanghyam 6*a*, Naparam 12*a*, Taparam 15*a*, Avarni 16*a*, Āvarni 21*b*, Ṣaḍviṁśatisūtram 39*a*, Vēda-lakṣanaviṣayakam 65*a*

Complete

This is a work in 100 stanzas giving a list of certain Vēdic words which appear to be capable o being split up in the Pada-pāṭha of the Taittirīya-Saṁhitā, but are really indivisible in that manner

The author of this work is Śrīvatsāṅka, son of Dēvamaniṣī

Beginning

मुनिमानसमन्थानमथिता[गस]गमसागरात् ।
उदिताय नमो भूयादमृताय मुरारये ॥

गुणत्रयविहीनाय जगत्त्रयविधायिने ।
श्रुतित्रयदृशे शश्वत् पुरत्रयमथे नम. ॥
नमस्कृ(त्य) विनेतार विप्रानामनुशिष्यते ।
अनिङ्ग्यमिङ्ग्यसादृश्याद्यत्सन्देहात्प(स्प)द पदम् ॥
श्रुतिश्चुच्छब्दनिर्दु(र्दि)ष्ट विकृतश्चापदात्मकै ।
स्यादनन्यवदङ्काराद्यकारादि च यत्पदम् ॥
भिर्भ्यांभ्यस्सुभिरर्वागोमाव ह्रस्वभागदीर्घश्च ।
नित्य विहाय न(ने)ङ्ग्य गोगीस्सुरदुन्दु चेति मिश्श्रुत्या ॥

End

हेमन्तहोलीयहिरण्ययश्रुतो हैमन्तिकश्रुच्च हिक हिरण्मयम् ॥
प्रपञ्चत्वादनिङ्ग्याना दिङ्मात्रमिह सूचितम् ।
अतोऽनुक्तश्च यत्किञ्चिदुन्नेयन्तन्मनीषिभि ॥
एषानिङ्ग्य(पदाना)पदवी सन्दर्शिता [सुधा] सुखी(धि)या ।
देवमनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥
इत्यनिङ्ग्यस्य ग्रन्थ नानावृत्त शत भवेत् ।

Colophon —इत्यनिङ्ग्य समाप्तम् ॥

No 854 अनिङ्ग्यम्

ANINGYAM

Substance, palm leaf Size, 17¾ × 1½ inches Pages, 10 Lines, 7 on a page Character, Telugu Condition, injured and worm-eaten Appearance, old

Begins on fol 34*b* The other works contained herein are Ratnatrayaparīkṣā with commentary (1*a*), Sarpabaliprayōgaḥ (3*a*), Tripuṇḍravidhiḥ (5*a*), Agnihōtrasthālīpākavidhiḥ (5*b*), Kūśmāṇḍa-hōmakalpaḥ (6*a*), Vaidikavijayadhvajaḥ (7*a*), Uccōdarki (34*a*),

Siddhāntaśīkṣā (39*a*), Paitṛmēdhikaprayōgaḥ (44*a*), Yajñōpavītavidhiḥ (50*a*), Kṛṣṇayajurvēdamantrapraśnaḥ (51*a*), Āpastambagṛhyam (65*a*), Ṣaḍviṁśatisūtram (81*a*), Śamānam (88*b*), Naparam (90*b*), Taparam (91*b*), Avarṇi (93*a*), Avarṇi (95*a*), Svarasankhyā (96*a*), Chāyāpuruṣalakṣaṇam (98*b*), Indrākṣīstōtram (100*a*), Mṛtyulāṅgūlamantraḥ (101*a*), Lakṣaṇaratnaparibhāṣā (103*a*), Bhāradvājasūtram (109*a*)

Complete

This begins as follows —

अनिङ्ग्यमिङ्ग्यसादृश्याथतसन्देहास्पद पदम् ।
श्रुतिश्रुच्छब्दनिर्दिष्ट विकृतश्चापदात्मकै ॥

No 855 अनिङ्ग्यम् सव्याख्यानम्

ANINGYAM WITH COMMENTARY

Substance, paper Size, 12¾ × 8 inches Pages, 58 Lines, 20 on a page Character, Grantha. Condition, good Appearance, new

Begins on fol 42*a* The other works herein are Saṁhitāśamānam with commentary (1*a*), Avarṇi with commentary (12*a*), Avarṇivyākhyā (20*a*), Naparam with commentary (24*a*), Taparam with commentary (31*a*), Vilaṅghyam (32*b*), Visarjanīyōttaraśakāraparaḥ (70*a*), Śākhāśamānam (71*a*), Siddhāntaśikṣā with commentary (74*b*), Siddhāntaśikṣā (112*b*), Mairāvaṇdcaritram (117*a*), Kuśalavōpākhyānam (147*a*)

Complete

The name of the author of the commentary is not mentioned

Beginning

दुग्धवारिधिसुतामभीष्टदा सम्प्रणम्य सकलामरै स्तुताम् ।
मेदिनीसुरमनोहरा मयानिङ्ग्यवृत्तिरभिधास्यते यथा ॥

तत्र चादौ श्लोकत्रयेण प्रारिप्सितस्य शास्त्रस्याविघ्नपरिसमाप्तये मङ्गलमादधानोऽभीष्टदेवतां नमस्कृत्य विषय दर्शयति अनिङ्ग्यमनुशिष्यत इति ।

मुनिमानसमन्थानमथितागमसागरात् ।
उदिताय नमो भूयादमृताय मुरारये ॥

वेदवेदान्तविदा मुनीनां मानसमेव मन्थान तेन मथितात् चिन्तितात् आगमो वेद स एव सागर तस्मादुदित आविर्भूत शेष व्यक्तम् ॥

गुणत्रयविहीनाय जगत्रयविधायिने ।
श्रुतित्रयदृशे शश्वत् पुरत्रयमथे नम ॥

गुणानां त्रय गुणत्रयम् । एवमुत्तरेषामपि त्रयाणा विग्रह सत्त्वरजस्तमोगुणरहित अणिमादिगुणान्वित इत्यर्थ । सृष्टिस्थितिलयरूपेण पृथिव्यादि लोकत्रय विदधातीति लोकत्रयविधायी । वेदत्रयचक्षुर्यस्यासौ श्रुतित्रयदृक् । पुरत्रयमथे तेषामसुराणामित्यनुवाके रुद्र इत्यब्रुवन्निति रुद्रशब्देन विवक्षितपुरुष इति तस्मा अयन्नमस्कार ।

नमस्कृत्य विनेतार विघ्नानामनुशिष्यते ।
अनिङ्ग्यमिङ्ग्यसादृश्यात् यत्सन्देहास्पद पदम् ॥

विघ्नानां विनेता विनायक तथ नमस्कृत्य वक्ष्यमाणविषयन्दर्शयति किमिति अनिङ्ग्यमनुशिष्यत इति । अनिङ्ग्यमित्यविभागपदमुच्यते न तु समासपद सत्यपि समासत्वेऽपि अञ्जसा न युज्यते प्रकृतिपरत्वोपपत्ते अन्यथा त्वनुदात्तं पदमेकवर्जितमिति तावदन्त्यगतः पदानामेकाक्षरवर्जमनुदात्तता विहितेति अनेकोदात्तत्व न भवति । अपि च अद्भ्यो दिग्भ्य इत्येवमादीनामसमासपदानामपि विभागत्वेनेङ्ग्यत्वात् अविभागपदमेवानिङ्ग्यमिति युक्तम् । अनुशासन शिक्षणम् इदमेव प्रयोक्तव्यम् ॥

End

एषानिङ्ग्यपदाना पदवी सन्दर्शिता सुधिया ।
देवमनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥

अनेन तैत्तिरीयशाखामधिकृत्य इदं शास्त्रं प्रदर्शित शास्त्रविदो जन्मनामकीर्त्यविच्छेदाय ॥

No 856 अनिङ्ग्य सव्याख्यानम्

ANINGYAM WITH COMMENTARY

Substance, palm leaf Size, 18 × 1¼ inches Pages, 50 Lines, 7 on a page Character, Telugu. Condition, good Appearance, not old

Complete Same as the last

Begins on fol 29*a* The other works contained herein are Vilanghyam with commentary (1*a*), Naparam with commentary (11*a*), Taparam with commentary (16*b*), Prātiśākhyavivarana Tribhāṣyaratna (19*a*), Samānasandhi with commentary (54*a*), Avēṣṭanapadāni (78*a*), Ravanabhēṭ (81*a*), Saptasvaralakṣana (92*a*), Yājyasaṁjñā (92*a*), Avēṣṭananāmāvali (93*a*)

Colophon

इत्यनिङ्ग्यव्याख्यान समाप्तम् ॥

कल्याण कुरुता प्रपञ्चपितरौ तौ नश्शिवौ दम्पती
मूर्ताधीश्वरतायथस्मितवृषाव्याजात्स्वमेवास्थितौ ।
यो नित्यौ समलङ्कृतौ श्रितहृदावन्योन्यमन्तर्धिया
मल्लीलायसमावभिन्नविजनाभावादिव प्रेमत ॥
नारायणावधान्यो(न्यु)पाध्यायस्य पुस्तकम् ॥

No 857 अन्तप्रदीपिका

ANTAPRADĪPIKĀ

Substance, palm-leaf Size, 14 × 1⅜ inches Pages, 3 Lines, 8 on a page Character, Grantha. Condition, good Appearance, old

Begins on fol 41*b* The other works herein are Smṛtimuktāphalam 1*a*, Ṣaḍviṁśatisūtram 7*a*, Vilaṅghyam 13*a*, Naparam 15*a*, Uccōdarki with commentary 17*a*, Yōhipräptibhāṣyam 22*a*, Yōhi

prāptiḥ 36a Uccasvaranirnayaḥ 39a, Svarāṣṭakam 41b, Plutānuśasanam 42b, Kriyāsvaralakṣanam 44a, Thadhakārasūtram 54a, Pūrvōttarobhayadirghi 46a, Laksanaratnam 47a, Trikramalakṣaṇam 54a, Sarvalakṣanavēdapaṭhaphalam 55a

Complete

This gives a list of words in the Kṛṣṇayajurvēda ending in long vowels and followed by the Visarga, and also indicates where the words ending in long vowels are followed by the Visarga and where not This work is helpful in enabling one to remember well the Padapatha of the Vēda

Beginning

अथान्तप्रदीपिका ।

दीर्घा विसर्जनीयान्ता विरामेषु तु सस्थिता ।
ये शब्दास्सहिताया स्युस्ते ज्ञाप्यन्तेऽधुना मया ॥
वर्णक्रमेण गृह्यन्त एते शब्दा यथाक्रमम् ।
व्यवहारोऽत्र भेदेन समासपदभागयो ॥
अन्तप्रदीपो नामेद लक्षण क्रियते मया ।
वेदात्मा भगवान्विष्णुरन्तेन प्रीयता मम ॥ इति परिभाषा ॥
अना अर्का अगा अद्रेररातीरप्यरोचथा' ।
अम्रा अश्वा अनीके(का) स्यादजिरा अग्निया अपि ॥
अन्तोदात्तकमग्ने(ग्रा) स्यादश्रमिष्ठा अजायथा ।
अक्ष्योरहो अमीवास्स्यादश्वैरस्या अ ष्यते ॥

End

शरीरैरपि शुष्माश्रीश्शभुस्स पर एव च ॥
सूनोस्साधोस्सुतास्साविस्सेनास्सत्यानस पर ॥
सूरा प्रसूवरीस्साहा हिता होत्रा हिरण्ययो ।
हिरण्यैर्हस्तयोरत्र नैभ्यस्सन्त्वधिका खलु ॥

Colophon.

अन्तप्रदीपलक्षण सम्पूर्णम् ॥

No 858 अवर्णि

AVARNI

Pages, 11 Lines, 6 on a page

Begins on fol 16*a* of the MS described under No 853

Complete

This work is intended to help the students of the Taittiriya-Saṁhitā in finding out where an initial अ or आ of words is merged in the final ओ, ए or आ of the immediately previous words under the rules of Sandhi

The author proposes to supply the omissions, to omit the excesses and to correct the errors found in the list of words given in another work of the same name forming 'part of the Varṇalakṣaṇa of ancient authors' (probably this reference being to a Prātiśākhya)

The author also says that he has added a commentary of his own, which, however, is not found in this codex, but is found in the MS described under No 860

Beginning

अवर्णीन्यनुक्तासमोऽप्यातिरिक्त (अवर्णिन्यनुक्त समाप्यातिरिक्त)
परित्यज्य दुष्कीर्तितश्चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेत
सवृत्तिं करिष्यामि विस्पष्टवाच्यम् ॥ 1 ॥
ओदेद्वर्णसन्छन्न सहिताया पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिद शास्त्र प्रणीयते ॥ 2 ॥
नोदात्तो य पदाध्याय उदात्तस्सहितागमे ।
यश्चोदात्त. पदाध्याये स्वरितस्संहितागमे ॥ 3 ॥
अघोषाक्षरत पूर्व ओकारस्स(सा)हितश्च य ।
तेभ्य पर पदाध्य(ध्या)ये त्वकारस्स्यात्पदादिग ॥

End

अहरचाहरन्ताहा अहार्यश्चाहुतादहम् ।
अहास्याहरतार्थैवेत्युक्तो ह्रस्वस्य सङ्ग्रह ॥

No 859. अवर्णदीप

AVARNADĪPAH

Substance, paper Size, 12¾ × 7½ inches Pages, 4 Lines, 30 in a page Character, Telugu Condition, good Appearance, new

Complete

Begins on fol 88*b*

The following other works are contained in the codex

	Fol		Fol
Rasārnavasudhākara	1*a*	Āpastambōpākarmaprayōga	92*a*
Śamānam	85*a*	Kavikalpalatā ..	99*a*
Vilaṅghyam	87*a*	Pārvatīparinayam ,	135*a*
Āvarni	90*a*	Aśvaśāstram (Śālihōtriyam) with Telugu notes	151*a*
Naparam	90*b*		
Taparam	91*b*		

This is a mnemonic work, similar to the one described under No 858, and treats of words beginning with अ or आ in the Ṛg-Vēda. The author of the work is one Dakṣiṇāmūrti of Vatsagōtra.

Beginning

गुरु गुणाब्धिं निखिलागमवाङ्मयं
प्रणम्य संसारसमुद्रतारकम् ।
पदाद्यवर्णावगमाय वच्म्यृचा-
मवर्णदीपाख्यमहं सुलक्षणम् ॥ 1 ॥

अत्रेष्टौ सौ वेदवर्णौ सुच्छन्नोऽ-
थाकारादीन्येतदन्तात्पराणि ।
उच्चो नोच्चस्तार उच्चोऽपि सान्ध्ये
पद्ये दीर्घो ह्रस्वभाग' ह्रुतश्चेत् ॥
युक्तानुक्तस्वारवर्गान्त्ययुक्त·
रा(मा)नुस्वारास्सहिताया पराश्चेत् ।
इङ्गच नानाचित्रितोऽसिश्चतैतान्
हित्वा घोषोदेतिरोत्साहितश्च ॥

End

अहन्यो ह्यनहिंसन्तीरहिन्वन्नप्यहेम च ।
अह न याह्य पूर्वो ह चक्रे चक्रे यथामति ॥
श्रीवत्सदक्षिणामूर्तिविदुषाकारसङ्ग्रह ।
अकारादिपदानान्तु कृतो विद्वद्भिरिष्यताम् ॥

Colophon.

अवर्णी सपूर्णम् ॥

No 860. अवर्णी—सव्याख्यान

AVARNI WITH COMMENTARY

Pages, 7 Lines, 20 on a page

Begins on fol 1*a* of the MS described under No 855

Complete

This contains the commentary referred to under No 858

Beginning.

अवर्णा(र्ण्या)ख्यलक्षणारम्भस्य वैयर्थ्यमाशङ्क्य परिहरति—
अवर्णा(र्णि)न्यनुक्तं समाप्यातिरिक्त
परित्यज्य दुष्कृतीन्तश्चाधि(दुष्कीर्तितश्चाभि)वीक्ष्य ।
ककारादिवर्णक्रमेणाहमेत

सद्वृत्तिं करिष्यामि विस्पष्टवाच्यम् ॥

प्राचीन(ना)वर्णा(र्ण्य)ल्यलक्षणे यदनुक्तमनुपदिष्ट तदुपदिश्य यन्निरर्थकमधिकमुक्त तत्परित्यज्य यद्दुरवगम तदपि ज्ञात्वा सद्वृत्ति व्याख्यासहितम् अकारादिवर्णक्रमासम्भवात् ककारादिवर्णानुव्यक्त वक्तु योग्य यथा भवति तथैव करिष्यामीति प्रतिज्ञा । अपि च पूर्वलक्षणस्यानुक्तचधिकोक्तिदुरुक्तिभिर्दुर्बोधतया हेयत्वात्तत्परित्यज्य निर्दोष लक्षणान्तर प्रणीयते इत्यर्थ । अथ वक्ष्यमाणमर्थं प्रयोजनञ्चाह—

ओदेद्वर्णसञ्छन्न सहिताया पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिद शास्त्र प्रणीयते ॥

अस्यायमर्थ ओदित्योकारस्य ग्रहण स च द्विविध साहितोऽसाहितश्च ।

End

तमाहरन्ति(चे) नायजत । तस्यामश्शश्वाहरन्त । पुनराहार्जातवेदा । आ त्वाहार्षमन्तरभू । अद्धादेकोऽहुतादेक । स पत्नी पत्याह गच्छे । अब्रुवन् कथाहास्था । तमाहरतान्तेन ॥

Colophon

इत्यवर्णव्याख्या

No 861. अवर्णि—सव्याख्यान.

AVARNI WITH COMMENTARY

Substance, plain leaf Size, 15 × 1⅜ inches Pages, 27 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

This work is the same as the one described under No 860, but the MS is more correct

Complete

Begins on fol 80a

The following other works are found in the MS —

The fly leaf gives the contents

	Fol		Fol
Arghyavacanam	1a	Sakhāsamānam	35a
Saptalakṣanasaṁjñādi	2a	Varnakramalakṣanam	39a
Plutaśikṣā	15a	Plutaśikhyā	43b
Pūrvōttarōbhayadīrgha padapankti	16a	Trikramam	44a
Yanādēśadirgha	19a	Lakṣanānukramanikā	44b
Yakārasyōkāraprāpti	19b	Yōhibhāṣyam	47a
Saptadēvasyatvacittādi	20a	Svarapañcāśat	60a
Ṣadviṁśatisūtram	22a	Sandhyāvandanabhāṣya	63a
Lakṣanānukramanika	34a	Āvarni Savyākhyā	103a

No 862 अवर्णि

AVARNI

Pages, 6 Lines, 5 on a page

Begins on fol 93a of the MS described under No 854

Complete Same as the last

Colophon

इत्यवर्णि समाप्त

No 863 अवर्ण्यादिवर्णमालिका

AVARNYĀDIVARNAMĀLIKĀ

Substance, palm leaf Size, 18¾ × 1½ inches Pages, 60 Lines, 9 on a page Character, Telugu Condition, good Appearance old

Begins on fol 64a

Almost complete

This codex contains just another work beginning on fol 1*a*, viz, Siddhāntaśikṣāvyākhyā

This work gives two lists of phonetically fused words from the Yajurvēda, *alphabetically arranged, and containing in the fusion* such words as begin with an elided अ or आ

Beginning

(1) अपहृतोऽररु	(6) अपावधीम्
(2) अग्नेऽदब्धायो	(7) अतन्द्रासोऽवृका
(3) अदब्धायोऽशीततनो	(8) अलाह ततुत्
(4) अच्युतोऽमात्य	(9) अपानो अङ्गे अङ्गे
(5) अग्नेऽयाशया	(10) अजराजरन्त.

End

स्वावेशोऽसि ।
स्वाहासीनाय स्वाहापलयिताय पर्वे ।
स्वाहासिताय ।
स्वाहाण्डाभ्याम् ॥

No 864 आपिशलिशिक्षा
ĀPIŚALIŚIKṢĀ

Substance, paper Size, 12¼ × 8 inches Pages, 9 Lines, 20 on a page Character, Dēvanāgarī Condition, good Appearance, new Written only on one side of the paper

Begins on fol 178*a*

Complete

The following is a list of the other works contained herein —

	Fol		Fol
Jaṭāvali	1*a*	Vyāliśikṣā . ..	44*a*
Siddhāntaśikṣā .. .	8*a*	Kālanirṇayaśikṣā .	45*a*
Āraṇyaśikṣā . ..	18*a*	Kauhalīyaśikṣā . ..	49*a*
Śambhuśikṣā .. .	35*a*	Vyālaśikṣā .. .	61*a*
Vāsiṣṭhaśikṣā . .	42*a*	Bhāradvājaśikṣā .	63*a*

	Fol		Fol
Rāvanabhāt ..	81*a*	Jaṭāmaṇi with commentary	142*a*
Lōmaśaśikṣā ..	83*a*	Vyāsaśikṣā .	187*a*
Nāradaśikṣā .	94*a*	Yōhipräptibhāṣyam .	219*a*
Sarvasammataśikṣā	124*a*		

This is a work on Vedic phonetics in which the vowels and consonants are named and classified, and their origin is also described in accordance with the views of Āpiśali on the subject

Beginning

अथ शीक्षा प्रवक्ष्यामि मतामापिशलेर्मुने ।
गुरुलघ्वादिविज्ञान तस्यारम्भप्रयोजकम् ॥
उक्त तत्सर्वमङ्गेषु शिक्षाव्याकरणेषु यत् ।
विकल्पभाजा शास्त्राणामपि दृष्टानुवर्तिनाम् ॥
तत्तच्छाखाविशेषेषु व्यवस्थार्थमिद स्मृतम् ॥

End

स्पृष्टत्वमीषत्स्पृष्टत्व सवृतत्व तथैव च ।
विवृतत्वञ्च वर्णानामन्त करणमुच्यते ॥
कालो विवारस्सवार श्वासनादावघोषता ।
घोषोऽल्पप्राणतालैव महाप्राण स्वरास्त्रय ।
बाह्य करणमाहुस्तान् वर्णाना वर्णवेदिन ॥

Colophon.

इत्यापिशलिशिक्षा ॥

No 865. आरण्यशिक्षा

ĀRANYAŚIKṢĀ

Pages, 17 Lines, 20 on a page

Begins on fol 18*a* of the MS described under No 864
Complete

The first verse evidently belongs to a commentary, but the codex contains only the text, hence that verse is out of place

This is a work dealing with the accent and pronunciation of words occurring in the Taittiriya Āraṇyaka

Beginning

विघ्नराज प्रणम्यादौ वासुदेव च कामदम् ।
आरण्यशिक्षाव्याख्यानमह वक्ष्ये यथामति ॥ १ ॥
गणपतिमभिवन्द्यावति(द्य)जातामयघ्न
स्वरपदमितिवर्णोद्बोधन शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिह नवशिक्षावारिधेरुद्धरामि ॥ २ ॥
आद्युदात्तानि वाक्यानि चैकद्वित्र्यादिसख्यया ।
विविधानि तु वृन्दानि विस्पष्टान्यत्र कृत्स्नश ॥ ३ ॥
उदाह्रियन्तेऽध्येतॄणा सन्देहाना निवृत्तये ।
आदिमध्यान्तग्रहण क्रियते यत्र तत्र तु ॥ ४ ॥
वाक्यानामिति मन्तव्य श्रुतित्वे(त्रे)कश्रुतेरिति ।
भवेतामाद्युदात्तौ च यत्तच्छब्दौ तु सर्वत ॥ ५ ॥

End ·

लक्षणेन विना विद्या विमलापि न शोभते ।
अप्राणस्येव देहस्य भूषणैरप्यलङ्कृतम् ॥ १२४ ॥
इत्थ न्यरूपि सकल स्वरवर्णजाल
स्वाध्यायपञ्चसु मुदे निगमे पटूनाम् ।
आरण्यके यदिह किञ्चन यानि(न न्य)रूपि ।
तद्बुद्धिमद्भिरखिल स्वयमूहनीयम् ॥ १२९ ॥

No 866 आरण्यशिक्षा सव्याख्या
ĀRAṆYAŚIKṢĀ WITH COMMENTARY

Substance, palm leaf Size, 15⅞ × 7⅜ inches Pages, 38 Lines, 7 on a page Character, Telugu Condition, good Appearance, old

Complete

Begins on fol 1a

The other works contained herein are Svarapañcāśat fol 20a Āraṇyasaṃhitāsandhi 23a, and commentary 24b, Vedalakṣaṇa praśaṃsā 27a, Āvarni 28a

Beginning

प्रारिप्सितप्रतिबन्धकविघ्नविघाताय कृत मङ्गल शिष्यशिक्षायै ग्रन्थतो निबध्नन् शिष्यावधानार्थं चिकीर्षित प्रतिजानीते—

गणपतिमभिवन्द्यावद्यजालामयघ्न
स्वरपदमितिवर्णोद्बोधन शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिव नवशिक्षावारिधेरुद्धरामि ॥

अवद्यजालामयघ्न विघ्नसमूहात्मकव्याधिनाशनमिति गणपतिविशेषणम्। शीलनेन अभ्यासेन स्वरपदमितवर्णोद्बोधनमित्यारण्यशिक्षामृतविशेषणम् आरण्यशिक्षायामादौ प्रतिपाद्यमाह—

आद्युदात्तानि वाक्यानि चैकद्वित्र्यादिसङ्ख्यया ।
विविधानि तु बृन्दानि विस्पष्टान्यत्र कृत्स्नश ॥

End:

यदिह किञ्चनेति इह ग्रन्थे किञ्च(न) निरूपणीय यन्न न्यरूपि तदखिलं बुद्धिमद्भि स्वयमूहनीय सम्प्रदायविद्भ्योऽध्यापकेभ्यो लक्ष(ण)स्वरूप विज्ञाय तदनुगुणलक्षणवत्तया स्वयमुच्चारणीयम् । न च सम्प्रदायादेव लक्ष्ये ज्ञाते लक्षणमकिञ्चित्करमिति वाच्यम् , गीती शीघ्री शिर कम्पीति शिक्षावचने अनर्थ इति पदेन लक्षणज्ञानाभावे प्रत्यवायस्योक्तत्वादर्थपदस्य लक्षणपरत्वादत्रापि

अन्थे लक्षणेन विना विद्येति तस्यावश्यकेनोक्तत्वात् कुत्रचिल्लक्षणेनैव सम्प्र-
दायस्य ज्ञातव्यत्वाच्चेत्यर्थ इति सर्वमवदातम् ॥

Colophon

इत्यारण्यशिक्ष (क्षा) समाप्त (प्ता) ॥

No 867 आरण्यशिक्षा सव्याख्या

ĀRANYAŚIKṢĀ WITH COMMENTARY

Substance, paper Size, 13 × 8 inches. Pages, 49 Lines, 18 on a page Character, Telugu Condition, good Appearance, old

Complete

Begins on fol 266a The following is a list of the other works contained herein

	Fol		Fol
Yajuḥ-Prātiśākhya	1a	Svaraśikṣā with commentary	253b
Prātiśākhyavyākhyānam Tribhāṣyaratnam	20a	Yōhipräptiḥ	294b
Kālanirṇayaśikṣā	100b	Lakṣmīkāntaśikṣā with commentary	300b
Uccōdarkiṭīkā	107b	Sarvasammataśikṣā with commentary	312b
Bhāradvājaśikṣā	114a	Yōhiprāptiśikṣā	334a
Bhāradvājaśikṣāvyākhyā	120a		
Vyāsaśikṣā with commentary	167a		

This commentary is fuller than the one described under the last number

Beginning

विघ्नराज प्रणम्यादौ वासुदेव च कामदम् ।
आरण्यशिक्षाव्याख्यानमह वक्ष्ये यथामति ॥

प्रारिप्सितप्रतिबन्धविघ्नविघाताय कृत मङ्गल ग्रन्थतो निरूप(ण)स्य प्रयोजन च दर्शयन् चिकीर्षित प्रतिजानीते—

गणपतिमभिवन्द्यावद्यजालामयघ्नं
स्वरपदमितिवर्णोद्बोधन (न)शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिह नवशिक्षावारिधेरुद्धरामि ॥

अवद्यजालामयघ्नं व्याधिवत् ग्रन्थरचनाप्रतिबन्धकसमूहविनाशकमिति गणपतिविशेषणम् । शीलनेन सम्यगभ्यसनेन स्वरपदमितिवर्णोद्बोधनमित्यारण्यशिक्षामृतविशेषणम् । आरण्यकप्रथमप्रश्ने उदात्तादिस्वरविषयेऽध्येतॄणा बहुधा विप्रतिपत्तिसत्त्वात् तन्निर्णयार्थं प्रतिजानीते ।

End

इत्थ न्यरूपि सकल स्वरवर्णजाल
स्वाध्यायपञ्चसु मुदे निगमेत(मोत्त)राणाम् ।
आरण्यके यदिह किंचन न न्यरूपि
तद्बुद्धिमद्भिरखिल स्वयमूहनीयम् ॥

ननु सकल स्वरवर्णजाल निरूपितमित्यसङ्गत स्वाध्यायब्राह्मणे अम्भस्य पारे इति प्रश्ने च स्थिताना श्रुतिवाक्यानामुदाहृतत्वेऽपि प्रथमप्रश्नशिक्षामिति प्रश्ने ब्रह्मवल्ल्या भृगुवल्ल्या स्थिताना श्रुतिवाक्यानामनुदाहृतत्वात् । न चादिमैकपदे ह्युच्चमित्यादिना लक्षणस्याभिनिहितत्वे लक्षणजाल सर्वं निरूपितप्रायमेव यथा गोस्सास्नादिमत्त्वे लक्षणेऽभिनिहिते तल्लक्षणाक्रान्ता सर्वापि व्यक्तिर्गौरिति निरूपितप्रायेति वाच्यम्, वैषम्यात्तत्र सास्नादिमत्त्वलक्षणस्य सिद्धत्वेन तद्दि(शि)ष्टा सर्वापि व्यक्तिर्गौरिति सुज्ञानम्, प्रकृते तु उदात्तादिस्वराणां पुरुषोच्चारणाधीनत्वेन अन्यथाप्युच्चारणसम्भवेन असिद्धत्वात् तथा च लक्ष्ये उदाहृत इदमिद श्रुतिवाक्यमिति विज्ञाय भवदुक्तलक्षणज्ञो भवति । अत त्व वै पूर्वं समभू । त्वमिद पूर्वं कुरुष्वेति । पुरः हिरण्मयीमित्यादौ उदात्तपूर्वस्वैरोव्यञ्जन इत्यर्थ । नोदात्तस्वरितपर इति निषेधाप्रवृत्तिरत्र विशेषो द्रष्टव्य ।

चित्त्यादिप्रश्नत्रितये संहितावत् स्वरो भवेत् । इतरेषु पञ्चसु प्रश्नेष्वपि अनुक्तविशेष वाक्यजाल संहितातुल्यस्वरमित्याह—

एकश्रुत्यादिक वाक्य विना सत्यसमस्वरम् ।
प्राप्नोत्येवोमिति परे ह्यवर्णान्तस्सदाशिवोम् ॥

सुब्रह्मण्य पर रूप नवोमित्यादि सर्वत । पदान्तादवर्णादोमित्यस्मिन् परे पूर्वपरयो स्थाने पररूपमेकादेश स्यात् । यथा सुब्रह्मण्योऽ सुब्रह्मण्योऽ सुब्रह्मण्योम् । ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

आरण्यके तु वाक्यान्ते उदात्तो नम उच्यते ।
नो पते वै महोजायसेभ्य पूर्वौ विगास्तथा ॥

* * * *

भू प्रपद्ये सर्वो वै नमश्च स्वरितो भवेत् ॥
न कश्चन यथोवाच स्वरान्तोपनिषद्भवेत् ।
सर्वं नारायणप्रश्न उच्चान्ता इति निर्णय ॥

No 868 आवर्णि

ĀVARNI

Pages, 3 Lines, 6 on a page

Begins on fol 95*a* of the MS described under No 854

Complete

This is a work giving a list of such words from the Yajurvēda as begin with an आ which is merged in the final vowel of the previous word. The work is attributed to Mahādhipati of Tintrinī (*i e* the tamarind tree) Family

Beginning :

आग्नीध्राग्रयणाज्योपावर्तानोत्यायुधश्रुति ।
आशीराहवनीयाग्नेयाग्नामुष्यायणश्रुति ॥
आत्मशब्दो नोरसादिरायुश्शब्दो न धात्पर ।
अन्तोदात्तो निहतो वाप्यादित्यश्रुतिरिष्यते ॥

End

आम्नातास्ताव आहृत्याहावमाहवनस्तथा ॥
अल्पेनाद्याहरन्ति स्यादाहनन्याय चाहलम् ।
आह ऋतुना स्मोपहत्या प्रपराश्राव्यानुवाक्यया ॥
आहुराकारपूर्वश्चेदेषावर्णिस्सुनिर्मित ।
तिन्त्रिणीकुलसम्भूतमहाधिपतियज्वना ॥

Colophon

इत्यावर्णिस्समाप्ता ॥

No 869 आवर्णि

ĀVARNI

Pages, 6 Lines, 6 on a page

Begins on fol 21*b* of the MS described under No 853

Complete

Same as the last The line mentioning the author's name is herein omitted

---

No 870 आवर्णि सव्याख्यान

ĀVARNI WITH COMMENTARY

Pages, 26 Lines, 5 on a page

Begins on fol 103*a* of the MS described under No 861.

Complete Same as the work described under No 868, with the commentary in addition

Beginning

इत पर पदादौ वर्तमानस्य आवर्णस्य सग्रह क्रियते ।
आकारादीनि सर्वाणि विभक्तानि पदान्यहम् ।
आग्नीध्राग्रय, &c, श्रुति ॥

आग्नीध्रे आग्रयणे आज्ये उपावर्त आप्नोति आयुध. आकारादीनि । नयवत्याचाग्नीध्रे । नमोवृक्तिवत्यचाग्नीध्रे जुहुयात् । श्रुतिनिर्देशात् सर्ववि-

भक्तिप्राकारादितो भवति । उत्तरेणाग्नीध्रम् । एवमुत्तरत्रापि । श्रुतिश्रुच्छन्द-निर्देशात् यथासम्भवमुदाहार्यं ।

End

आत्मान पराह तस्मात्, आश्राव्याह देवान्, पुरोऽनुवाक्ययाह, आहैतत्पूर्वमाहुश्चैतेषाम् आवर्णी सुनिर्मित ॥

Colophon

आवर्णीव्याख्यान समाप्त (म्) ॥

No 871 आवर्णिव्याख्या
ĀVARNIVYAKHYA

Pages, 8 Lines, 20 on a page
Complete
Begins on fol 20*a* of the MS described under No 855

Beginning

आकारादीनि सर्वविभक्त्यन्तानि पदान्याह—आग्नीध्रे, अन्तरिक्षमि-वाग्नीध्रम्, ऋचाग्नीध्रे 'जुहुयात् । इध्र इति किम्? दक्षिणाग्नीषो-मीयम् ।

End

देव सवितरेतत्ते प्राह, यद्ब्राह्मण पराह, आश्राव्याह देवान्, प्रैवैन पुरोऽनुवाक्ययाह । एतत्पूर्वं किम्? एतावता हैनसा । आहुश्च—यस्य समुद्र रसया सहाहु' ॥

Colophon

॥ इत्यावर्णो(र्णि)व्याख्यान सम्पूर्णम् ॥

No 872 आवर्णि
ĀVARNI

* Pages, 2 Lines, 30 on a page
Complete

Begins on fol 90*a* of the M^s^ described under No 859.

This is a work of the same nature as the one described under No 868, it seems to relate to the words of the Ṛg Vēda

Beginning

आकृतिश्चाकृतिश्चे(श्चै)व क्षितिमाक्ष्ण चागहि(सि) ।
आग्नीध्रादागमिष्टाग आगमन्नागतेन च ॥
आगत्य स्यादाचरन्त्याचरेदा(रन्ती)च(राज)रदा(आ)जि च ।
इङ्गचा जुह्वा नागताजदाजित्वात्मादनिङ्गचक ॥

End

आकारादिपदानान्तु सृष्टाय प्रतिपादितम् ।
यथामति हृदि प्रीत्या धार्यं विद्वज्जनैस्सदा ॥

Colophon

आवर्णि समाप्तम् ॥

No 873 अवेष्टनपदानि

AVĒṢṬANAPADĀNI

Pages, 6 Lines, 7 on a page

Begins on fol 78*a* of the MS described under No 856

Complete

Words that are not divisible in the Padapātha of the Kṛṣṇa-Yajurvēda are herein found arranged alphabetically

Beginning

श्रीगणाधिपतये नम

अजगरेण,	अनिष्टृत.,
अरोचथा ,	अन्हृति ।
अदन्दशूका ,	

End

सालावृकेभ्य ,
सावन्याभ्याम्,
हवामहे,
हरिमाणम्,
हलीक्ष्णान्,

No 874 उच्चस्वरनिर्णय
UCCASVARANIRNAYAH

Pages, 5 Lines, 7 on a page

Begins on fol 30*a* of the MS described under No 857

Complete

This is a treatise in two chapters on the determination of those Vēdic words which have the Ucca or high accent on the final syllable as well as of those which have it on the initial syllable

Beginning

प्रणम्य नारायणपादपङ्कज ,
समस्तलोकत्रितयार्तिहारिणम् ।
करिष्यते वेदपदानि पाठतो
निरूप्यतो(चो)च्चस्वरानिर्णयो मया ॥
अन्तोदात्त पदश्चेदमाद्युच्चमिदमीदृशम् ।
नियमो न कृत कैश्चित् कस्मिश्चित्स्वरलक्षणे ॥
एकादेशोऽथवादेश उदात्तस्सहितागमे ।
ओर्वेदलोप्युदात्तो यो विषयो लक्षणस्य स ॥
अन्तोदात्त पद यत्स्यादाद्युदात्तन्तथैव च ।
एतद्द्वयं पद ज्ञातुमिदं शास्त्र प्रणीयते ॥
अत्रान्तोच्चस्वर पूर्वमकारादिक्रमेण तु ।
आद्युच्चश्च ततोऽनेन क्रमेणैव च गृह्यते ॥

नानात्वमिङ्गचभूताना पदानामत्र चेष्यते ।
व्यस्तान्यभिविनिप्रेतान्यन्तोदात्तपदानि च ॥

End

एति तद्वद्धिरण्येन चैकैकस्मात्तथा भवेत् ।
ओषधिर्वे(र्वो)षिधीनाश्च तथौषधय ओषधी ॥

इत्याद्युच्चस्वरसमुच्चय समाप्त ॥

No 875 उच्चोदर्कि

UCCŌDARKI

Pages, 2 Lines, 6 on a page

Begins on fol 34*a* of the MS described under No 854

Complete

A work on the determination of the two accents, Udātta and Pracaya, they having to be indicated by the fingers of the reciter, each in a peculiar way, when a Svarita accent is followed by an Udātta or Pracaya

Beginning

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रह ।
क्रियते हस्तविन्यासभेदोच्चारणासिद्धये ॥
यदेकस्मिन् पदे स्वारपूर्वोदात्तो न विद्यते ।
संहितालक्षण तस्मादिदमित्यवगच्छत ॥
उदात्तप्रचयौ भिन्नौ स्थानवास्थानभेदत ।
अस्मिन् तावेव गोष्ठे ते राष्ट्रे लोके क्षये पर ॥

End

अस्माकमक्ष्योरसद्ना प्राणोऽश्वात्यूर्जमश्विना ।
ज्योतिरन्नाद्यमन्वाग्मन् वै बृहस्पतये जया ॥

Colophon

इत्युच्चोदर्कि समाप्त ॥

No 876 उच्चोदर्कि—सव्याख्यान

UCCODARKI WITH COMMENTARY

Pages, 9 Lines, 6 on a page

Begins on fol 28a of the MS described under No 131

Complete

The author of the commentary found herein is not known

Beginning

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रह ।
क्रियते हस्तविन्यासभेदोच्चारणसिद्धये ॥

नित्याभिनिहतक्षैप्रा स्वरितविशेषा यस्मात् पूर्वे उदात्तात्पूर्वभूता-तस्य नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रहो निश्चय क्रियते हस्तविन्यासासि-द्धये भेदोच्चारणसिद्धये च नित्याभिनिहतादिलक्षण प्रातिशाख्ये द्रष्टव्यम्

End

पदेषु स्वारपूर्वो वर्ण उदात्त । अवरुद्ध९ ह्यस्याश्रम् । अस्येति पदम् निह-तमपि अन्नशब्देनैकादशे उदात्त । सुवर्ग्याण्यासन्, याज्यास्स्युस्तास्साय, तस्मै होतव्या वर्प्म वै, आरण्योऽजो नकुल, सोऽजाऽतिखोजा मल्हा, यस्यातिग्राह्या न, अन्तरिक्षदेवत्यो हि, आयुद्योऽस्माकम्, प्राणोऽक्ष्योश्चक्षु, तेऽस्मत्पाशान्, द्वे सक्थ्यौ(कथ्यौ) द्वौ बाहू, प्राणोऽश्नाति स प्राणम् । प्राण इति किम् ? अयोऽ-श्नाति । मनुष्या ऊर्जम्, आनुजावरोऽश्विनौ । ज्योतिरन्नाद्यमन्वाग्मन् वै बृह-स्पतये जया ज्योति अन्नाद्यमन्वाग्मन् वै बृहस्पतये जया एषिङ्गयाना पदेषु स्वारपूर्वो वर्ण उदात्त । यथा सुवर्ग्या, ज्योतिर्गौरायुरिति, तया वै सोऽ-न्नाद्यम्, त इमेऽन्वाग्मन्, वैश्वदेव्यो वै प्रजा, पयस्या बृहस्पतये, चतुरक्षरा सत्यजया ॥

Colophon

इत्युच्चोदर्कव्याख्यान सपूर्णम् ।

No 877 उच्चोदर्कि—सव्याख्यान
UCCŌDARKI WITH COMMENTARY

Pages, 10 Lines, 6 on a page Character, Nandinagari

Begins on fol 17*a* of the MS described under No 857

Complete

This work is like the last except that the illustrations in the commentary are fuller

---

No 878 उच्चोदर्कि—लघुवृत्तिटीकासहितम्
UCCŌDARKI WITH A COMMENTARY called LAGHUVRTTI

Pages, 13 Lines, 24 on a page

Begins on fol 107*b* of the MS described under No 867

Complete

In this codex the commentary is found after the whole of the text is given At the end of the commentray a few verses are added, in which the place where the Pracaya-svara occurs is pointed out After that a few more verses regarding the perform ance of the annual ceremonies in honor of dead ancestors are also given

Beginning of the Commentary

नित्याभिनिहतक्षैप्र इति । अस्यायमर्थ —

नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रह इति अनेकदेशेष्वाश्रमभेदात् विप्रकीर्णानामेकत्र सङ्गृह्य पठनसङ्ग्रह । तत्र नित्यलक्षण यकारसहितो वकार-सहितो वा अनुदात्तपूर्वो वा पूर्वरहितो वा अक्षर यत्र स्वर्यते स नित्य यथा—स धन्यस्त्वोता , ततो विल्व ।

End

नेङ्गचाश —वीर्यै वा अग्नि , पयस्या बृहस्पतये, चतुरक्षरा सत्यजया । इङ्गचाशपदेष्वेषूदात्तस्वारात्पराक्षरम्—उदात्तेष्वेतेषु पदेषु नित्यादिस्वाराक्षर-मुदात्त स्यात् कथ भूतेषु ईङ्गचैकदेशेष्वित्यर्थ न त्विङ्गचपदस्य ॥

Colophon

उदात्तप्रचयनिर्णयलघुवृत्तिस्समाप्ता ॥

उदात्तात्परतो नास्ति प्रचय पूर्वतोऽपि वा ।
स्वरित प्रचयादूर्ध्वं निहतात्प्रचय परम् ॥
पदादौ प्रचयो नास्ति स्वारादेकपदे तत ।
नास्त्युदात्तोऽस्त्य(प्य)विज्ञेयो हस्तविन्यासकर्मणि ॥
ओष्ठ्ययो स्वरयोर्मध्ये सयोगादिर्यदि स्थित ॥
विसर्गात् क्षपरादूर्द्ध्वमुभयत्रार्द्धमात्रकम् ।
मात्रावर्तोनुस्रुवितिस्तथा वत्सानुसारिणी ॥
पादोना स्यात्पारवती पादमात्रा पिपीलिका ।
पूर्ववर्णप्रयत्नेन न वदेदुत्तर बुध ॥
ओम पवर्गसयोगे प्रयत्नो नेष्यते पृथक् ।
नित्याभिनिहतक्षैप्रपूर्वोदात्तस्य सङ्ग्रह ॥
अविभक्ता पृथग्ग्रामा स्वस्वार्जितधनाशना ।
प्रतिसा(स)वत्सर पित्रो १वस्वगृहेषु कारयेत् ॥

*   *   *   *

विवाहोत्सवयज्ञेषु चान्तरे मृतसूतकम् ।
शीतमन्न परधीय कर्तृभोक्तुश्च न स्पृशेत् ॥
आमश्राद्धन्तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यमे ।
पार्वणञ्चापराह्णे तु प्रातर्वृद्धिनिमित्तके ॥
सवत्सरश्चोदकुम्भं दर्शश्राद्धानुमासिकम् ।
क्रमेणैव प्रकुर्वीत कुर्यात्तत्रोत्तरोत्तरम् ॥

No 879 ऋक्प्रातिशाख्यम्

RKPRĀTIŚĀKHYAM

Substance, paper Size, 13¼ × 8 inches Pages, 36 Lines, 24 on a page Character, Telugu Condition, good Appearance, new

Contains 18 Paṭalas Begins on fol 1a The other works herein are Ṛgvēdānukramaṇikā 21a, Ṛgvēdaparibhāṣā 46a, Kātyāyana sarvānukramaṇikāvṛttih 53a, Kālajñānam 135a

At the end of the work under notice there are about two pages of matter on the characteristics of Jaṭā

The work deals with the orthagraphy, pronunciation and prosody of the Ṛgvēda The contents of the 18 chapters are given on page 137 of Rājēndralala Mitra's Catalogue of the Sanskrit MSS in the Library of His Highness the Maharaja of Bikaner

Beginning

परापरे ब्रह्मणि य सदाहु
वेदात्मान वेदनिधिं मुनीन्द्रा ।
त पद्मगर्भं परमन्त्वादिदेव
प्रणम्यर्चां लक्षणमाह शौनक ॥
माण्डूकेयस्संहिता वायुमाह
तथाकाश चास्य माक्ष(ण्ड)व्य एव ।
समानतामनिले चाम्बरे च
मत्वागस्त्यो विपर(रि) हारन्तदेव ॥
अध्यात्मब्रह्मसौ शूरवीरस्सुताश्च
वाङ्मनसयोर्विपदन्त्यानुपूर्वे(र्व्ये) ।
सन्धेर्विवर्तन निर्भुज वदन्ति
शौद्धाक्षरोच्चारणन्तु प्रतृण्णम् ॥
उभये(य)मन्तरेणोभय व्याप्तमग्रे
वरे कामा अन्ननाकोभयाज्याख्या ।
प्राणेष्व(णष)कारे यश्च बल णकारे
वाक्प्राणयोर्यश्च होम परस्परम् ॥
गुरुत्व लघुता साम्य ह्रस्वदीर्घप्लुतानि च ।
लोपागमविकाराश्च प्रकृतिर्विक्रम क्रम ॥

स्वरितोदात्तनीचत्व श्वासो नाद[ा]स्तथोभयम् ।
एतत्सर्वन्तु विज्ञेय छन्दोभाषावि[धीयता](म)म् ॥
अस्य ज्ञानार्थमिदमुत्तरत्र वक्ष्ये शास्त्रमखिलशैशिरीये ।
ऋग्वेदे पारायणपाठे शाकल्ये शैश(शि)रीयके ॥
पदक्रमविभागज्ञो वर्णक्रमविचक्षण ।
स्वरमालाविशेषज्ञो गच्छेदाचार्यसपदम् ॥

अकारकारावि उएओऐऔपदाद्यन्तयोर्नलकारस्स्वरेषु ।

End

लघ्वक्षराणा लघुवृत्तिशब्द सर्वं
लक्ष्यक जागतमेव विन्द्यात् ।
यश्छन्दसा वेदविशेषमेत
भूतानि च त्रैष्टुभजागतानि ।
सर्वाणि रूपाणि च भक्तितो य
स्वर्ग जयत्येभिरथामृतत्वम् ॥ स्वर्गं जयत्येभिरथामृतत्वमिति ॥

Colophon

इति प्रातिशाख्ये अष्टादश पटल ॥
इति ऋग्वेदप्रातिशाख्य समाप्तम् ॥

Beginning

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।
अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेव च जटा विधीयते ॥

क्रमे यथोक्ते द्वाभ्यामित्यादिनोक्तक्रमेण पदजात पदद्वय पदत्रय वा उच्चार्य पूर्वमादौ उत्तरमवसानपर द्विरभ्यसेत् द्विवार पठेत् अभ्यस्य ततस्सन्धानद्वारा पूर्वं प्रथम पद विलोमतयोच्चार्य द्विरभ्यसेत् । तत क्रमवदुक्त्वा कुर्यादवसानम् ॥

End

पदसन्धानाद्विशेषितस्य स्वरस्याभिधाने ज्ञाने च
स्वर(रो)विधेया(यो)हि यथाश्रुतैस्स्वरै
परे(दे)ष्वथामन्त्रितजातकेष्विह ।

अत्र जटापठने पदेषु यथाश्रुतैस्स्वरैरुदात्तवदेकीभावमित्याद्युक्तक्रमेण स्वरसन्धानं कर्तव्यम् । पद

No 880 ऋक्प्रातिशाख्यम्
RKPRĀTIŚAKHYAM

Substance, paper Size, 13 × 8¼ inches Pages, 35 Lines, 27 on a page Character, Telugu Condition, good Appearance, new

Contains 18 Patalas

Begins on fol 1*a* A commentary relating to this work begins on fol 23*a* of this codex

Complete

Same as the last

No 881. ऋक्प्रातिशाख्यम्
ṚKPRĀTIŚĀKHYAM

Substance, palm-leaf Size, 12¾ × 1⅜ inches Pages, 59 Lines, 7 on a page Character, Nandināgarī Condition, good Appearance, old

Breaks off in the 17th Patala, but it is erroneously stated in the colophon on fol 29*b*, wrongly introduced there, that all the 18 Paṭalas are complete.

Begins on fol 1*a* The other works herein are Ṛgdēvatāchandōnāman 31*a* Vāyustutivyākhyānam 180*a* Pañcasaṁskāraviṣayasangrahaḥ 207*a* and Pādmatantram 221*a*

Same as the last

No 882, ऋक्प्रातिशाख्यव्याख्या

RKPRĀTIŚAKHYAVYĀKHYA

Pages, 201 Lines, 27 on a page

Begins on fol 23*a* of the MS described under No 880

Complete

This commentary is said to have been composed by Uvaṭa and is called Pārṣadavṛtti

A few specially added stanzas at the end describe the Mātrā, Prayatna and the Svara of the Praṇava, and also mention the merit flowing from knowing and using it well

Beginning

सहिता पद(प्र)कृति । पदान्तान्पदादितस्सह सन्दधीतेति यत्सा कालाव्यवायेन, पदानि प्रकृति यस्या सहिताया सेय पदप्रकृतिस्सहिता सा सन्धिकृता वेदितव्या । न पदानीह शास्त्रे साध्यन्ते ऐन्द्रव्याकरणादित प्रकृतानि पदानि तस्मादन्यत्र सिद्धानां पदानां विधिरुच्यते इत्यर्थः । का पुनस्सहिता? पदान्तान् पदादित सह सन्दधीतेति यत्सा कालाव्यवायेन सा संहिता । अय देवाय जन्मने । सहिता सज्ञाया प्रयोजनम्

इति शौनकीये प्रातिशाख्ये श्रीपार्षदवृत्तौ संहितापटल द्वितीयम् ।

End

गायत्र्यादीनि छन्दासि सोम आहुतय पुरा ।
भान्ति सर्वमिद कृत्स्न त्रैलोक्य सचराचरम् ॥
धन्य यशस्यमायुष्य पुण्य पुष्टिकर शुभम् ।
आत्यन्तिक चापवर्ग छन्दसा ज्ञानमुत्तमम् ॥
छन्दोज्ञानात्पर ज्ञान नान्यदस्तीति मे मति ।
आहुर्यस्माद्द्विजश्रेष्ठा तस्माद्विद्यात् प्रयत्नतः ॥

इति शौनकीय ऋग्वेदप्रातिशाख्यपार्षदवृत्तौ भागार्थ छन्द पटल नामाष्टादशम् ।

Colophon

इति श्रीशौनकीयप्रातिशाख्ये तृतीयाध्यायस्य बार्हत प्रगाथादि छन्द पटलं नाम षष्ठम् ॥ तृतीयाध्यायस्समाप्त ॥

सार्धा चतुस्सहस्री च चतुष्षष्ठ्याधिका तथा।
व्याख्याने प्रातिशाख्यस्य ग्रन्थसङ्ख्येयति विद्यते ॥
चतुर्मात्रश्च षण्मात्र प्रणव कीर्त्यते बुधै ।
पूर्वस्स्वर परो नाद समीमात्र प्रकीर्तित ॥
अनुदात्तस्वरो ज्ञेय उदात्तो नाद उच्यते ।
लक्षण प्रणवस्येदं प्रणवो ब्रह्म कीर्त्यते ॥
तैलधारमिवाच्छिन्न दीर्घं घण्टानिनादवत् ।
अवाच्य प्रणवस्याग्र यस्त वेद स वेदवित् ॥
त्रिस्थान च त्रिमात्र च त्रिब्रह्म च त्र्यक्षरम् ।
त्रिमात्रादर्धमात्रन्तु यस्त वेद स वेदवित् ॥
वेदो हि वर्णसङ्घातो वेदो ब्रह्मेति कीर्त्यते ।
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ॥
अनेन विधिना वेद योऽधीते श्रद्धयान्वित ।
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥

एतत् पवित्र पापघ्न वाङ्मलस्य विशोधनम् ।
भक्त्या ज्ञात्वा च सङ्ख्या ब्रह्मलोके महीयते ॥ नमश्शौनकाय नम' ॥
अज्ञानमोहाद्यदि विभ्रमाद्वा यत् किञ्चिदून लिखित मयेह ।
तत् सर्वमार्य परिशोधनीय न दोष आर्या खलु लेखकस्य ॥

No 883 ऋक्प्रातिशाख्यवृत्तिव्याख्या.

RKPRĀTIŚĀKHYAVṚTTIVYĀKHYĀ

Substance, palm leaf Size, 10 × 1⅝ inches Pages, 178 Lines, 6 on a page Character, Telugu Condition, good Appearance, not old

Incomplete Patalas 1 to 6 complete

A gloss on Uvata's commentary on the Ṛkprātiśākhya, by Viṣṇumitra, son of Vedamitra, a resident of the Campā country

Beginning

अत्र भाष्यकृतस्सर्वान् प्रणम्य शिरसा मुनीन् ।
शौनकन्तु विशेषेण येनेदं पार्षदं कृतम् ॥
तस्य वृत्तिः कृता येन त सत्ययशस तदा ।
तेषा प्रसादादेवास्य स्वशक्त्या वृत्तिमारभे ॥
लेख्यदोषनिवृत्त्यर्थं विस्तारार्थं क्वचित्क्वचित् ।
बह्वुदाहरणार्थाय योज्यते सा मया पुन ॥
तस्यास्समापने शक्तिं त एव प्रदिशन्तु मे ।
लब्ध्वा काममहं तेभ्यो गच्छेय पारमीप्सितम् ॥
चम्पाया न्यवसत्पूर्वं वत्साना कुलमृद्धिमत् ।
तस्मिन् द्विज(व)रा जाता बह्वृचा पारगोत्तमा ॥
वेदमित्र इति ख्यातस्तस्मिन् जातो महायशा ।
चर्चापाठेऽखिलश्रेष्ठ सुतस्तस्य महात्मन ॥
नाम्ना वै विष्णुमित्रस्तु कुमार इति शब्द्यते ।
तेनेय योजिता वृत्तिरुदाहरणमण्डिता ॥
पण्डिता' परिगृह्णन्तु सुप्रसन्नामिमा मम ।
अज्ञानाद्यदुपात्त स्यात्तदजूकृत्य योज्यताम् ॥
शास्त्रावतार सबन्ध ज्ञात्वादौ च प्रयोजनम् ।
सुखबोध्य भवेच्छास्त्रमिति शिष्टानुशासनम् ॥
शौनको वै गृहपति नैमिशीयैस्तु दीक्षितै ।
दीक्षान्ते चोदितस्त्वाह सात्रीये द्वादशाब्दिके ॥

इति शास्त्रावतार स्मरन्ति । अथ सबन्ध मु(उ)च्यते—अय द्विजातीनां वेदाभ्यासः सकलपुरुषार्थसिद्ध कारणमिति वैदिकसिद्धान्त । स च पुरु-

षार्थश्चतुर्विध —धर्मोऽर्थ कामो मोक्षश्चेति । तदप्युक्तमृग्विधाने पवमाने नाभानेदिष्ठहृद्येषु पुरुषसूक्तादिषु । वेदाभ्यासो हि पञ्चधा विहित —अध्ययन विचारोऽभ्यसन जपोऽध्यापनमिति । तथा च स्मर्यते—

वेदस्वीकरण पूर्वं विचारोऽभ्यसनञ्जप ।
तद्दानश्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ इति

तदपि वक्ष्यति—एक श्रोता दक्षिणतो निषीदतीत्यध्ययनम्; अभ्यासार्थे द(द्रु)तां वृत्तिमित्यभ्यसनम्, प्रयोगार्थे तु मध्यमामिति जपादि; तद्दानश्चैव शिष्येभ्य इत्यध्यापनम्, पारायण वर्तये(त्)ब्रह्मचारीत्येवमादि च । तस्मादधीतवेदस्य सति सामर्थ्ये सम्पूर्णफलापेक्षया विचार प्राप्त स विचारो द्विविध अर्थतो लक्षणतश्चेति । तथा चोक्तम्—

स्थाणुरय भारहार किलाभूदधीत्य वेद न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकल भद्रमश्नुते (स) नाकमेति ज्ञानविधूतपाप्मेति ॥

तथा च

लक्षण यो न वेत्त्यृक्षु न स कर्मफल लभेत् ।
लक्षणज्ञो हि मन्त्राणा सकल भद्रमश्नुते ॥

इति तस्मात्तावत्पूर्वं लक्षणमुच्यते लक्षणपूर्वक हि अर्थपरिज्ञानम् । तथा चोक्तम्—

स्वरो वर्णोऽक्षर मन्त्रास्तत्प्रयोगार्थ एव च ।
मन्त्र जिज्ञासमानेन वेदितव्य पदे पदे ॥ इति ।

सर्वशास्त्रादौ नमस्कार कुर्वन्त्याचार्या यथा स्वयभुवे ब्रह्मणे विश्वगोप्त्र इति, सवात्मान विश्वसृज स्वयम्भुवमिति च । पितृदेवऋषिसङ्घेभ्य इति । अतोऽत्रापि शौनक आचार्यो भगवान् शास्त्रादौ नमस्कार प्रतिज्ञाश्च (च)काराविघ्नार्थम्—

परापरे(व)रे ब्रह्माणि य सदाहु
वेदात्मान वेदनिधिं मुनीन्द्रा ।
त पद्मगर्भ परमन्त्वादिदेव
प्रणम्यर्चौ लक्षणमाह शौनक ॥

परश्चावरश्च परावर पर नाम मनसा ध्यानगम्यं सदसदात्मक वेदान्तेषु यदुच्यते तदेतद्धृदय मन(श्चे)त्यादि तथा च महापुरुष इति यमवोचामे-त्यादि । तथा अय ज्योतिरजर ब्रह्म । स ब्रह्मामृत सदसदात्मकमिति । महश्च अणु च विश्वेश विंशतिज्योतिरुत्तममिति च ।

* * * *

ख्यातौ खकारयकारौ एके । ख्यातेर्धातो खकारय(श)कारयोस्स्थाने खकार-यकारौ वक्तव्यौ मन्यन्ते एके आचार्या । अख्यद्देव । तावेव ख्यातिसदृशेषु नामसु । तावेव खकारयकारौ ख्यातिसदृशेषु नामसु वक्तव्यौ मन्यन्ते एके आचार्या । सख्ये सखाय ॥

Colophon

इति पार्षदव्याख्यायां द्विर्वचनपटलष्षष्ठ सपूर्ण ॥

End

आहत्य एकत्रिंशत् । पादादाविति किम्? द्यावा नो अद्य पृथिवी । नू चिद्दधिष्व मे गिर । अत्रैव वोऽपि नह्यामि । न्वेववर्जं न सयोगे । नु एव इत्येते पदे वर्जयित्वा यच्छत तत्सयोगे परे न प्लवते । अद्य त्वा वन्वत्सु-रेक्णा , पुरु त्वा दाश्वान्, अथ त्वमिन्द्र, पिबस्व धेनवानाम् । न्वेववर्ज-मिति कस्मात् ॥

No 884 ऋग्विधानम् शौनकीयम्

RGVIDHĀNAM, ŚAUNAKĪYAM

Substance, palm leaf Size, 11¼ × 1½ inches, Pages, 293 Lines, 7 on a page Character, Nandināgarī. Condition, good Appearance, new

Incomplete Breaks off in the 18th Adhyāya

The ऋषि, छन्दस्, देवता and the app'ıcation and माहात्म्य of each Sūkta of the ten Maṇḍalas are given in order in this work. Just at the point where this Anukramanikā should end, there is ग्रन्थपात Then begins रोगशान्ति, which consists of certain ceremonies for the removal of various diseases personified as cruel and harmful beings This portion is called उत्तरकल्प which in this codex, contains two chapters in full and only the beginning of the third chapter These appear to be appendices added to the main work

Beginning

शौनक उवाच

नियत न हि वेदाना मन्त्राणा कलिदोषत ।
कलिदोषनिवृत्त्यर्थं गायत्रीं पूजयेद्द्विज ॥
गायत्रीमन्त्रसिध्यर्थं गायत्रीमयुत जपेत् ।
सर्वेषां वेदमन्त्राणा सिध्यर्थं लक्षक तत ॥
गायत्रीमन्त्रसिध्यर्थं सप्तव्याहृतिसम्पुटम् ।
अयुत चेज्जपेत्पूर्वं गायत्री सिद्धिदा तदा ॥

* * * *

अग्निमीळे नवमधुच्छन्दा(न्दो) ऋषि , गायत्री छन्द , अग्निर्देवता ।

अग्निमीळे जपेत्सूक्त पापघ्न श्रीकर च यत् ।
पारायणफल तस्य वेदाना चैव तत्सदा ॥
आग्नेयमाद्यसूक्त तु मुख्य ब्रह्मर्षिसम्मतम् ।
रायस्पोषकर धन्य जपन् विप्रोऽर्थमाप्नुयात् ॥
ऋषिस्सर्वमिद जप्त्वा स पूतो नियतश्शुचि ।
सहिताफलमाप्नोति ऋग्वेदस्य न सशय' ॥
एकादशगुण ह्येतज्जपन् ब्रह्म सनातनम् ।
सर्वान् च ı ानवाप्नोति पापेभ्यश्च प्रमुच्यते ॥

* * * *

Colophon

इति शौनकीयऋग्विधाने अष्टमाष्टके सप्तमोऽध्यायस्समाप्त ॥

* * * *

End

कुर्वीत वास्तुशमन मध्ये गोष्ठस्य धर्मवित् ।
पुण्यैर्गन्धैश्च माल्यैश्च वानस्पत्यैस्तदौषधै ॥

वास्तु सर्वं प्रतिशिरे सर्वधान्यैस्तथैव च ।
जपेच्छा(र)त्र पायसेन यथाविधि ॥

औदुम्बरपलाशैस्तु बलिं प्रतिदिन यथा ।

* * * *

एवमादि नरो ज्ञात्वा रोगोपद्रवशान्तये ।
जपहोमादिकर्तव्य पूर्वमुक्तविधानत ॥

क्षुद्रेष्वनुक्तरोगेषु सङ्करीकरणाद्विना ।
स्वरूपमेव जानीयात् सर्वशान्तिषु कर्मसु ॥

* * * *

विकीर्णकेशी रोगाणा प्रतिरूप प्रकल्पयेत् ॥

इति शौनकीयऋग्विधान उत्तरकल्प ॥

Beginning.

अथ द्वितीय । ऋषय ऊचु

शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतम महत् ।
दशश्लोक्यमिद स्तोत्र वदामि ध्यानपूर्वकम् ॥

अङ्कुशं चाक्षसूत्र च पाशपुस्तकधारिणीम् ।
मुक्ताहारसमायुक्ता देवीं ध्यायेच्चतुर्भुजाम् ॥

*End.

प्रथम भारती नाम द्वितीय च महेश्वरी ।
तृतीय शारदा देवीं चतुर्थं कंसमर्दिनी ॥

पञ्चम च जगन्माता षष्ठ चैव तु पार्वती ।
सप्तम चैव कामाक्षी अष्टम ब्रह्मपुत्रिका ॥
नवम चैव वाराही दशम ब्रह्मचारिणी ।
एकादश तु वाग्वाणी द्वादश वरदाम्बिका ॥

Colophon

इति शौनकीयऋग्विधाने उत्तरकल्पे द्वितीयस्समाप्त ।

अथ शिष्टरोगमूर्तिलक्षणम् । त्रिदोषशूलस्वरूपम् ।
त्रिदोषशूलरोगस्स्यात् दशहस्त' खरानन ।
त्रिलोचनश्शक्तिशूलपाशखड्गाङ्क(द्राक्ष)शस्त्रभृत् ॥
त्रिशूलत्रितयैर्मर्त्यान् आपात्य क्षतयन् हृदि ।
नासानिहिततर्जन्या मोहयन् पारिपार्श्वकान् ॥

End

पानात्पय प्रभूताङ्ग पाण्डुरायतविग्रह ।
चक्राङ्कुशखर क्रूर' कुटिलेक्षणलालस ॥

No 885 ऋग्वेदलक्षणम्

RGVĒDALAKṢANAM

Substance, palm leaf Size, 15 × 1¼ inches Pages, 20 Lines, 5 on a page Character, Telugu Condition, injured Appearance, old

Incomplete

Begins on fol 3*a* The other works contained in the MS are Vaiśvadēvavidhiḥ 1*a*, Vikṛtivalli 13*a*

This is a work on the various kinds of Pādas or metrical lines found in the 8 Aṣṭakas of the Ṛgvēda

Beginning

देवा वै प्रथमेनाह्नेन्द्राय वज्र समभरस्त द्वितीयेनाह्नासिञ्चस्तृतीयेनाह्नाप्या ऋतेन मित्रावरुणादस्रायुवाकवस्सुता ब्रह्म च वरुणश्श्रुधि । अथ द्वादशेन

पाद त्वन्नो अग्ने पित्रोरुपस्थ आराय स्पूर्धि स्वधा वोऽस्ति हिते । अत्राह तत्कण्व एषा कण्वतम ।

End

आपो दीर्घं विश्वजिते अरिष्टिमा नो ब्रह्मण्यरिष्ट तातूत इन्द्रवधेन दस्युमिन्वकरा वावशाना ग्रावाणा वावृधाना आन्यूनमथ वा यन्नासत्याय ह्या कक्षीवानुभे भद्रे उदिर ।

No 886 ऋग्वेदपरिभाषा

RGVEDAPARIBHĀṢĀ

Pages, 11 Lines, 20 on a page

Begins on fol 46*a* of the MS described under No 879

Incomplete

This work mentions the number of stanzas, and the names of the Ṛṣi, Devata and Chandas, in relation to every hymn in the Ṛgvēda

Beginning

अथ ऋग्वेदाम्नाये शाकल्के सूक्तप्रतीके ऋर्क्सङ्ख्यात्रर्षिदैवतछन्दास्यनुक्रमिष्याम यथोपदेश न ह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणा ब्राह्मणार्षेयछन्दोदैवतविज्ञानाध्यापनाभ्याम् । स श्रेयोऽधिगच्छति

End

आदौ पञ्चाक्षरौ पादौ तृतीयसप्ताक्षरश्चतुर्थो नवाक्षरस्सप्तम्या पञ्चको मुख्योदित इत्यर्थ ।

तृतीयस्सप्तको नवकश्चे ऋक्कृत चिद्धिष्म ४ ५ ५ ७ ९ । अष्टम्या पञ्चकपादश्चतुष्कसप्तकस्त्रैष्टुभश्च शिवा न सख्युचेति । ऋक् ५ ४ ७ ११

No 887 ऋग्वेदपरिभाषा

RGVĒDAPARIBHĀṢĀ

Substance, palm leaf Size, 16 × 1¼ inches Pages, 6 Lines, 6 on a page, Character, Telugu Condition, slightly injured, Appearance, old

Complete

Begins on fol 3a The other works herein are --Vēdāngajyautiṣam 10a, Chandas 6a, Ṛgvēdānukramaṇikā 10a, Saptasvaram 35a

Beginning Same as above

End

ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसा दितिः ।
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ॥
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥
श्रीर्लाक्षा सार्पराज्ञीव श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिता ॥

The date of copying is given in Telugu as follows —

Copied by Kṛṣṇa on the 15th of Kartika, Thursday in the year Siddhārti

---

No 888 ऋग्वेदपरिभाषा

RGVĒDAPARIBHĀṢĀ

Substance, palm leaf Size, 12×1¼ inches Pages, 43 Lines, 7 on a page Character, Kanarese Condition, good Appearance, old

Incomplete

Begins on fol 14a' The other works contained in the codex are Śikṣāśāstram 1a, Vēdacchandas 4a, Kālajñānam 8b, Śamānam 10b, Vilinghyam 36a

Same as the last

After the 31st fol in the work under notice, there are four leaves, numbered as 19 to 22, which do not continue consecutively the work However, they also treat of the same subject

Beginning

ऋग्वेदाम्नाये शाकलके सूक्तप्रतीके ऋक्सङ्ख्याऋषिदैवतछन्दांस्यनुक्रमिष्याम —यथोपदेश न ह्येतद्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणा ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्याम् । स श्रेयोऽधिगच्छत्येताभ्या मेव । अनेवंविदो यातयामानि च्छन्दांसि भवन्ति । स्थाणु वर्छेति गर्ते वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते

End

सौपर्णी नवमी वज्रसस्तुतिरयमिति । द्यृचेनेन्द्र आत्मानमस्तौदुपान्त्ये याच्योधक्षोल(ऽथ षोड)श जमदग्निर्भार्गवो मैत्रावरुण प्रागाध त्रिलिङ्गुबन्त तृतीया गायत्र्या परासतो बृहतिस्तोत्र राजसुक् सपादादित्याश्विन्यौ वायव्ये सौर्यौ ॥

No 889 ऋग्वेदानुक्रमणिका

ṚGVĒDĀNUKRAMAṆĪKĀ.

Pages, 46 Lines, 20 on a page

Begins on fol 21*a* of the MS described under No 879

Complete

A work, similar to the last, but by a different author

Beginning

अग्नि नवमधुच्छन्दो वैश्वामित्त्रा वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाश्विना द्वादश । अश्विनैन्द्रवैश्वदेवसारस्वतास्तृचास्ससैता प्रउगदेवता सुरूपकृत्न दशैन्द्रमा तु युजन्त्या वहेत्येता

End.

तदेतत्सूक्तसहस्र ससप्तदशक सपादाधिकम् । वर्गाणा द्वे सहस्रे चतुर्विंशोत्तरे । ऋचा दशसहस्राण्यृचा [दशसहस्राणि ऋचा] पञ्चशतानि च ऋचामशीति । पादश्च पारायण स प्रकीर्तितम् । शाकल्यदृष्टे पदलक्षमेक सार्द्ध

तथा त्रिसहस्रयुक्तम् अष्टौ शतानि षड्विंशति पदसङ्ख्या प्रकीर्तिता । ऋग्वेदपारायणपाठे शाकल्ये शैशिरीयके नमश्शौनकाय नम परमऋषिभ्य ॥

* * * *

सूक्तमध्ये योऽवसाने अष्टवर्यिस्स पापकृत् ।
गतायुर्मुनिहन्ता च रौरव नरक व्रजेत् ॥
अविदित्वा ऋषिच्छन्दोदैवत योगमेव च ।
योऽध्यापयेज्जपेद्यस्तु पापीयान् जायते सुत ॥
एकैकस्य ऋषेर्ज्ञानात् सहस्रायुर्भवेद्द्विज ।
छन्दसामपि सालोक्य छन्दोज्ञानादवाम(मु)यात् ॥

No 890 ऋग्वेदानुक्रमणिका

RGVEDANUKRAMANIKA

Pages, 118 Lines, 6 on a page

Begins on fol 10*a* of the MS described under No 887

Complete

The copying is said in the end to have been completed on Tuesday, the 11th, of the bright fortnight of Pramādi year, and the copyist's name is said to be Śrī Rāmasētu, a resident of Garakubākapura

At the end of the work the characteristics of the various modes of Udātta svara are mentioned in a few verses

---

No 891 कालनिर्णयशिक्षा

KALANIRNAYASIKṢĀ

Pages, 4 Lines, 19 on a page

Begins on fol 45*a* of the MS described under No 864

Complete

This work treats of the Mātrā, or prosodial time-measure of letters, and of accents and stops

Beginning

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

अखण्डवर्णविषयो वर्णांशविषयोऽपि च ।
विरामविषयश्चेति त्रिविध काल उच्यते ॥

स्वरवर्णविरामाणा भिन्नवाग्वृत्तिवर्त्तिनाम् ।
ऐकरूप्येण कालस्य कथनन्नोपपद्यते ॥

मध्यमां वृत्तिमाश्रित्य मया चेय कृति कृता ।
प्रातिशाख्ये निषिध्यान्या यस्मात्सैकैव बोध्यते ॥

End

परेण नित्यसबन्ध प्रादिं परपदन्तथा ।
एकस्वराणा चादीना प्रादीनामिति तद्द्वयम् ॥

यो यो विरामकाल प्रागृगादौ समुदीरित' ।
अङ्गीकृतस्यार्द्धमात्र तु न सोऽधिक इष्यते ॥

Colophon

कालनिर्णयशिक्षा सम्पूर्णा ॥

No 892 कालनिर्णयशिक्षा सव्याख्या.

KĀLANIRṆAYAŚIKṢĀ WITH COMMENTARY

Pages, 18 Lines, 22 on a page

Begins on fol 100b of the MS described under No 867
Complete

This commentary is by Muktiśvarācarya on the Śikṣā noticed above

Beginning

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामतिं ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

श्रोतृबुद्धिमनस्समाधानार्थं प्रकरणे प्रतिपाद्यमर्थं दर्शयति इह कालो निरूप्यत इति। अनेन विषयो दर्शित । निष्प्रयोजने प्रकरणे प्रेक्षावत्प्रवृत्त्यनुपपत्तेस्तत्सिद्ध्यर्थं स्वग्रन्थस्य प्रयोजन दर्शयति वेदतत्त्वावबोधार्थमिति। वेदस्य तत्त्वस्यावबोध वेदतत्त्वावबोध तदर्थं वेदतत्त्वावबोधार्थम्। अनेनार्थज्ञानकामिनोऽधिकारो दर्शित । स्वग्रन्थस्य मूलन्दर्शयति प्रातिशाख्यादिशास्त्राणीति । प्रतिशाखासबन्धि प्रातिशाख्यम्

End

एक एव स्वरो येषा ते एकस्वरा तेषा पदाना योऽयं चादे पूर्वपदान्तवद्भाव प्रादे परपदादिवद्भावश्चोक्त तदुभय चादीना प्रादीनामेकस्वरत्व एव भवति । बहुस्वरत्वे

प्रपरापसमन्ववनिर्दुर्व्याङ्न्यध्यप्यतिसूदभयश्च ।
प्रतिना सह लक्षयितव्या पर्युपयोरपि लक्षणमत्र ॥
इति प्रादयो विंशति चादयोऽनन्ता ॥

Colophon

इति श्रीमुक्तीश्वराचार्यकृतौ कालनिर्णयदीपिका समाप्ता ॥

Beginning

आदावनुक्ते स्रवति परस्ताच्च विशीर्यते ।
तस्मात्समुच्चरेद्ब्रह्म रक्षायै छन्दसा स्फुटम् ॥
प्रामे मध्यन्दिने चैव तस्य कतिधा भवेत् ।
एक द्वे पञ्चक त्वेकमवसान इति क्रमात् ॥
वेदेन सह यद्वाक्यमुदात्तान्त प्रकीर्तितम् ।
यत्र भिन्नत्वमाप्नोति स्वरित चाधिगच्छति ॥

End

प्र, परा, अप, सम्, अनु, अव, नि, दु, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, एते प्रादयो विंशति । चादयोऽनन्ता इति ॥

No 893 कौहलीयशिक्षा
KAUHALĪYAŚIKṢĀ

Pages, 12 Lines, 17 on a page

इद विष्णु सुरे स्वाहा विष्णव इदम् । अथ सायमग्निहोत्रं जुहोति । काले प्रातर्होमस्सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोम ।

* * * *

अग्निहोत्रमारप्स्यमाणो दश होतारं होष्यामि । चित्तिस्स्रुक्—आ-
स्मासु नृम्णं धात्स्वाहा वाचस्पतये ब्रह्मण इदम् ॥ अथाग्निहोत्रम् ॥

भावस भाद्रपदशुद्धसप्त ॥

No 1125 अग्निष्टोमप्रयोग

AGNIṢṬŌMAPRAYŌGAḤ

Substance, palm-leaf Size, 18¾ × 1⅜ inches Pages, 120 Lines, 8 on a page Character, Telugu Condition, injured Appearance, old

Complete

Contains the Prayōga of the Agniṣṭōma-sacrifice (as in the above mentioned five Praśnas, 10—14)

Same as the last

No 1126 अग्निष्टोमप्रयोग

AGNIṢṬŌMAPRAYŌGAḤ

Substance, palm-leaf Size, 15¼ × 1¾ inches Pages, 180 Lines, 7 on a page Character, Grantha Condition, much injured Appearance, old

Complete

Same as the preceding

No 1127 अग्निष्टोमप्रयोग

AGNIṢṬŌMAPRAYŌGAḤ

Substance, paper Size, 8½ × 6⅝ inches Pages, 77 Lines, 20 on a page Character, Telugu Condition, good Appearance, new Copied for the Library in 1894

Complete

Contains the portion relating to the Yajamāna of the sacrifice This is said to have been composed by Puruṣōttamabhaṭṭa, son of Dēvarājārya

Beginning

यज्ञेश्वर विभु देव यज्ञाना फलदायिनम् ।
श्रीभूमिनीलासहित नौमि सर्वार्थसिद्धये ॥
पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
अग्निष्टोमादिक्लृप्तिस्सुस्पष्ट क्रियतेऽधुना ॥

अग्निष्टोमप्रयोग तत्र याजमानम् अग्निर्देवो देवहोतेति अमुक शर्मण सोमो भविष्यति इत्युक्ते तत्रभवतोद्गात्र कर्तव्यमित्युक्ते उद्गाता आधानादिषु कर्मसु क ऋत्विज नारायणशर्मादय इत्युक्ते उद्गाता के याजयन्ति ते चान्ये च इत्युक्ते उद्गाता

End

इ चारवगिशेराञ्जपाश्रुखूतान आ ऊपा ऊप् चाखिरोमिहाइ । इति यज्ञ-पुच्छ सर्वक्रतुना समानम् ॥

Colophon

इत्यग्निष्टोमप्रयोग ॥

No **1128** अग्निष्टोमप्रयोग

AGNIṢṬŌMAPRAYŌGAḤ

Substance, palm leaf Size 18¾ × 1½ inches Pages, 251 Lines, 6 on a page Character, Grantha Condition, good Appearance, old

Incomplete

The first and the last leaves are injured The work is similar to the last.

Beginning

त्रिपू(रु)षसोमपीथविच्छेदार्थम् ऐन्द्राग्न पशु दौर्ब्राह्मण्यनिर्हरणार्थम् आश्विन पशुश्च अग्नीषोमीयेन पशुना सहोपालभ्य(म्भ्य) कुर्वन् सोमेन यक्ष्ये । ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना एकविंशतिदक्षिणेन तेन परमेश्वर प्रीणयानि ।

End

यमिन्द्रमाहुर्वरुण यमाहु(र्यं मित्रमाहु)र्यमु सत्यमाहु । यो [दवाना]देवानान्देवतप(म)स्तपोजा । तमा(सा)इन्द्राय सुतमा(जु)होमि स्वाहा इन्द्रायेदम् । वषट्कृते जुहोमीति स्वाहा व(ष)डिन्द्राय । अग्ने स्विष्टकृत इदम् । वषट् कृतानुवषट्कृते हुत्वा हरति भक्षम् । त भक्षयथ प्रवर्गैकर्तरमस्तस्यारण्येऽनुवाक्यो भक्षमन्त्र होताध्वर्युर्ब्रह्मा प्रतिप्रस्थाताग्नीध्रयजमानश्च ॥

No 1129 अग्निष्टोमप्रयोग
AGNIṢTOMAPRAYŌGAH

Substance, palm leaf Size, 14⅝ × 1¼ inches Pages, 192 Lines, 5 on a page Character, Grantha Condition, injured Appearance, old The first two leaves are half torn

Contains the Prayōga according to the Śrautasūtra, Praśnas 13 and 14 The latter part, however, is incomplete

Beginning

महारात्रे बुध्वा महारात्रे बुध्यमानेषु=ब्रह्मा बुद्धा (अग्ने नय सुपथा) राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ।

End

तस्य(।)मेव स्थाल्या संनिष्कासितायां श्रपयति । तद्बर्हिस्तन्मे क्षणम् । श(।)लमुखीये प्रचरन्ति । उत्तरेण गार्हपत्यमित्यादिप्रस्तरमानी(य) पूर्वस्मिन्निदधाति बर्हिषि निदधाति । अत्र व्रतप्रवेशनम् । प्रस्तराहरणादिपात्रसादनकाले प्रायणीयाय स्थालीश्च स्फ्यश्च द्वन्द्वमितराणि प्र ॥

No 1130 चयनप्रयोग॰
CAYANAPRAYŌGAH

Pages, 121 Lines, 8 on a page

Begins on fol 10*a* of the MS described under No 1055

Contains the Prayōga relating to the two Praśnas, 16 and 17, of Āpastamba Śrauta-Sūtra, which treat of the construction of altars and of the rites connected therewith

Beginning

चयनप्रयोग उच्यते—अग्निश्चेष्यमाण । अग्निरितीष्टकाकृत स्थण्डिल-मुच्यते तश्चेष्यमाणस्त्यहादिदीक्षापक्षे उखासम्भरणप्रभृत्यामिक्षापर्यन्तानि कर्माणि वसन्ते यथा भविष्यन्ति पर्वण्युखासभ(म्भ)रणपक्षे एकाष्टकायाश्चे-त्स्यामुखासम्भरण पश्विष्ठ्यादि सर्वं वसन्ते चतुरो मासा । इत्यस्मिन् पक्षे एकाष्टकायाश्च लभ्यते ।

साग्निचित्यस्य क्रतो प्रयोग उच्यते—पर्वणोरेकाष्टकाया वा प्रात-रग्निहोत्र हुत्वा प्राणानायम्य सङ्कल्प करोति—द्वादशाहेनाहीनभूतेन साग्नि-चित्येन सर्वपृष्ठेन सर्वस्तोमेनान्वह द्वादशशतदक्षिणेन प्रजायेय स्वर्गं लोकमवाप्नवानि । विद्युदसि । अस्मिन्नहीनभूतद्वादशाहे सोमप्रवाक त्वां वृणीमहे । भविष्यामि । सोमप्रवाक सोमऋत्विग्भ्य प्रब्रूहि । देवदत्तशर्मणो द्वादशाहो भविष्यति तत्रभवताध्वर्यव कर्तव्यमि-त्यादि ।

End

अग्निचित् वर्षति न धावेत् । यस्माद्देशाद्धावनं कृत तत्स्था-नमावर्तयते । वायव्येन पशुनेष्ट्वा सवत्सरादर्वाक् सोमेन यजेत नान्यस्यामपि स्त्रीणामुपगमन क्षत्रियवैश्यविषय पक्षिमासप्रतिषेधश्च ॥

Colophon ·

पर्याप्तोऽथ साग्निचित्य॰ क्रतु ॥

* * * *

No 1131. चयनप्रयोग
CAYANAPRAYŌGAH

Pages, 111 Lines, 20 on a page

Begins on fol 217*a* of the MS described under No 237

Complete

This work gives the ritualistic procedure relating to the seven kinds of 'Cayana or the arrangement of bricks for building the altar, viz, Vikrtisarvakratu 217*a*, Kāthaka-Savitra 223*a*, Nāciketa 229*a*, Caturhōtriya 230*b*, Vaiśvasrja 231*b*, Maitrāvaruna 233*a*, Ārunakētuka 234*a* The colophon at the end of the work attributes it to the authorship of Ramacandrādhvarīndra

Beginning

अथ चयनप्रयोग । विकृतिषु सर्वेषु क्रतुषु चयन प्रकृतावपि के चिदिच्छन्ति । प्रथम(म) प्रवर्ग्योपसदौ कृत्वा सुब्रह्मण्याह्वान षडहे पञ्चाहे चतुरहे त्र्यहे द्व्यहे श्वस्सुत्यामिति विशेष । आह्वानान्ते महाग्निं चिन्वन्ति तस्मिंश्चीयमाने पश्चिमेन पुच्छ गत्वा दक्षिणेऽपिकक्षे तिष्ठेत् । अपिकक्ष आत्मपक्षयो सन्धिप्रदेश इत्यर्थ ।

End

इरा ५ इद १ त्राणि पूरू २३ भो २ हि १० मा इजा १२ सा ३२३४ औ ५ होवावा ३२३४ सू ५

Colophon

इति श्रीविकृतिसर्वक्रतुषु चयनप्रयोगस्समाप्त ॥

Beginning

काठकचयने सावित्रम्—

अथ काठका उच्यन्ते । प्रथम तावत् सावित्रकर्मोच्यते । सावित्रमिति चित्योऽग्नि पशुबन्धे विधीयते । अमावास्यायां पौर्णमास्यां चतु-

र्दश्या वा प्रातरग्निहोत्र हुत्वा प्राणानायम्य सङ्कल्प'—ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये । समारोप्य देवयजन गत्वा मथित्वोपावरोह्यायतने निधाय, विद्युत् । अथाग्निसङ्कल्प —सावित्रमग्निं चेष्ये स्वर्गं लोकमवाप्नवानि इति उक्त्वा शर्कराणामुपकल्पन पश्चाशीतिशतमित्यादि ।

End .

मन्त्रेण प्रतिग्रह समुत्क्रम्येत्यादिनिरूढपशुबन्धवत् ब्राह्मणतर्पणान्तम् अनन्तरे सौत्रामण्या वा पशौ नित्ये काम्ये चाहीने सत्रे विधीयते । सन्तिष्ठते सावित्र ॥

Beginning

काठकचयने नाचिकेतम्—

एतेन नाचिकेतव्याख्यानम्—तस्य कर्म चतुर्दश्या वा प्रातरग्निहोत्र हुत्वा, विद्युदसि । अथाग्निसङ्कल्प —पुन प्राणानायम्य नाचिकेतमग्नि चेष्ये स्वर्गं लोकमवाप्नवानीति । उपकल्पनकाले एकविंशतिहिरण्येष्टका' तत्सङ्ख्या शर्कराणा वोपकल्पनम् ।

End

अग्निर्मे वाचि श्रित । अन्तरितिष्ठत्वमृतस्य गोपा इत्यनुवाकसमाप्तेर्ब्रूयात् । अग्निरौपयजानीत्यादि समान' सावित्रवत् मैत्रावरुण्यामिक्षा च ॥

समाप्तो नाचिकेत ॥

Beginning

काठकचयने चातुर्होत्रियम्—

एतेन नाचिकेत(तेन)चातुर्होत्र( )व्याख्यात —तस्य कर्म चतुर्दश्यां वा प्रात पशुसङ्कल्प , समारोप्य देवयजन गत्वा निधाय, विद्युदसि । अथाग्निसङ्कल्प —चातुर्होत्रमग्निं चेष्ये स्वर्गं लोकमवाप्नवानीति । यावत्पद हिरण्येष्टका' यजुष्मत्य

End

एव षडशीतिसप्तति स्वयमातृण्णादिब्राह्मणतर्पणान्त नाचिकेतवनी-(वन्मै)ता(त्ता)व[ा]रुण्यामिक्षा च ॥

समाप्तश्चातुर्होत्र ॥

Beginning

काठकचयने वैश्वसृजम्—

एतेन चातुर्होत्रेण वैश्वसृज(ज)व्याख्यात (तम्)—तस्य पूर्ववत्कल्प । चतुर्दश्या प्रातरग्निहोत्र हुत्वा पशुसङ्कल्प, समारोप्य दे निधाय, विद्युदसि । अथाग्निसङ्कल्प—वैश्वसृजमग्निं चेष्ये स्वर्गं लोकमावाप्नवानीति । द्विचत्वारिंशद्धिरण्येष्टका तावतीश्शर्करा वाभ्यक्ता पूर्ववद्दधिमध्वादीनामुपकल्पनम्

End

तस्माद्विश्वसृजोम् । विश्वमेनाननुप्रजायते । समानलोकता यन्तो(म्) । य एतदुपयन्ति । ये चैनत् येभ्यश्चैनत्प्राहोम् ॥

Beginning

काठकचयने मैत्रावरुणम्—

मैत्रावरुण्यामिक्षेष्ट्या यक्ष्ये । विहरणादि । अथ यत्राय । इमामूर्जम् । आमिक्षा हवि । इषे त्वा ऊर्जे त्वा इमां प्राचीं पशुपामह व्रतप्रवेश पयस्वती आदित्योपस्थानान्ते उत्तरेण गार्हपत्यमित्यादि

End

अन्वाहार्यो दक्षिणासंस्थावान्ते वाजिनयाग । चातुर्मास्येषु वैश्वदेवपर्वण्युक्त यज्ञशश्रमवर्जं ब्राह्मणतर्पणान्तम् ॥

Beginning

काठकचयने आरुणकेतुकम्—

यो ब्रह्मणे सृष्टिविधायिने पुरा
महाजले स्वान्तनुमाश्वदर्शयन्(त्) ।

सहस्रशीर्षाक्षिपदाय पूरुषा-
भिधाय कूर्मारुणकेतवे नम ॥

अथापस्तम्बीयारुणकेतुकाग्ने प्रयोगो वक्ष्यते। तत्रादावारुणकेतुकश-ब्दस्य निर्वचनम् । त वा एतमरुणा केतवो वातरशना ऋषयोऽचि-न्वन् । तस्मादारुणकेतुक इति। तत्रापस्तम्ब । आरुणकेतुको ब्राह्मण-व्याख्यात इति अस्यार्थ आरुणकेतु(क) पश्चम काठको नित्य स ब्राह्मणव्याख्यात प्रायेण ब्राह्मणो व्याख्यात इति। केभ्य पश्चम कैथ नित्य इत्यत आह

End

व्रत समाप्य कर्मेश्वरार्पण कृत्वा ब्राह्मणान् भोजयेत् । सन्तिष्ठत आरुणकेतुक ।

वह्नेरारुणकेतुके(तो)र्थत्प्रयोगस्य निरूपणम् ।
प्रणीत रामचन्द्रेण पुरुष तेन तुष्यन्ति(तु) ॥

Colophon

इति श्रीवेदविहितसकलधर्मानुष्ठानतत्परसमस्तदेवरथप्रवर्तकश्रीमहोपा-ध्यायरामचन्द्राध्ववी(ध्वरी)न्द्रेण विरचितापस्तम्बीयारुणकेतुकाग्ने प्रयो-ग(ः)समाप्त ॥

No 1132 आरुणकेतुकचयनम्

ĀRUNAKETUKACAYANAM

Pages, 7 Lines, 6 on a page

Begins on fol. 61*a* of the MS described under No 1048

Complete

Ritual relating to the Āruṇakētukacayana, one of the seven kinds mentioned under the last number

Beginning

एतेनारुणकेतुको व्याख्यात —यावन्मात्रमबीष्टका लोकम्पृणाश्चतस्र स्वयमातृण्णाश्चाप एव पुष्करपर्णं रुक्म कूर्मं हिरण्मय पुरुषमित्यातपति । वर्ष्यादि यथा समाम्नात पल्वल्या अशोष्या इत्युक्तमुत्तरवेद्या निवपनकाले तूष्णीं जानुदघ्नीं खात्वान्यत्र मृद निदधाति ।

End

इद सर्वमिति ब्राह्मण ब्रह्म वा आपो यदाप उपधीयन्ते । ब्रह्म चैतदात्मन्धत्ते । ब्रह्मणस्सायुज्यमाप्नोति । य एतमग्निं चिनुते । सन्ति ष्टत आरुणकेतुक आरुणकेतुक ॥

विक्रमोर्जसिताष्टम्या लिखत्यारुणकेतुकम् ।

No 1133 लोष्टचयनम्
LŌṢṬACAYANAM

Pages, 16 Lines, 20 on a page

Begins on fol 280*b* of the MS described under No 237.

Complete

This treats of the ceremony of arranging clods of earth on the spot where an Agnihōtrin has been cremated

Beginning

महाग्निचित काठकचितो वा लोष्ठ(ष्ट)चयन कुर्यात् । दशाहप्रभृति अयुङ्क्ष्वहस्सु अहोरात्रार्धमासमासर्तुसवत्सरे वा लोष्टचिति॰ कर्तव्या । चितिदिनात्पूर्वेद्यु कर्ता स्म(श्म)शानदेश गत्वा प्राचीनावीती प्राणानायम्य पितुर्गोत्रस्य शर्मण लोष्टचयन करिष्ये इति सङ्कल्प्य यङ्कवपक्षमाश्रित्य प्रयोग

End

तूष्णीमाहवनीये जुहोति । प्रजापतय इदम् । एष विधिर्विधुरस्याहिताग्नेरपि ॥

समाप्त

स्त्रीणा सापिण्ड्यादिनिर्णय । स्त्रीणा भर्तृसापिण्ड्यमेव कार्यम् । न तु श्वशुरादिसापिण्ड्यम् । तथा च सुमन्त(न्तु)—

भ(र्तु) पित्रादिसापिण्ड्य भर्त्रैकेन सह स्त्रिया ।
अनपत्यास्त्रिया एतदिति यत्तत(द)साम्प्रतम् ॥

Colophon

लोष्ठचयन समास (सम्) ॥

No 1134. चयनोपस्थानम्

CAYANŌPASTHĀNAM

Pages, 24 Lines, 18 on a page

Begins on fol 46*a* of the MS described under No 1030

Complete

The final prayer in the Cayana-rite, as used in the various sacrifices and as adapted to the various castes

Beginning

तत्र ज्योतिष्टोमो द्विविध रथन्तरपृष्ठको बृहत्पृष्ठकश्चेति । तत्र ब्राह्मणस्य प्रथमे ज्योतिष्टोमप्रयोगे रथन्तरमेव पृष्ठ द्वितीये बृह(त्) तृतीये रथन्तरमित्येवमजामित्वाय बृहद्रथन्तरयो(र्व्य)त्यास इत्याहु । आर्षेय कल्पे न तु त्रयो वर्णाल्पा इत्यादिना ब्राह्मणस्य सर्वदा रथन्तरमेव पृष्ठ क्षत्रियस्य बृहदेवेत्युक्तम् । अत्र बृहत्पृष्ठस्तु ज्योतिष्टोमस्येत्थ प्रयोग प्रदृश्यते ।

End

अस्य च गानप्रकार पूर्वस्मिन् ज्योतिष्टोमे प्रवर्गोद्वासान्ते प्रदर्शित । रथचक्रादिषु द्वयनेषु पक्षपुच्छश्चाद्यभावेन तत्तत्प्रदेशे गानमिति विशेष । समान अग्निष्टोमेन इति साग्निचित्यस्य विशेष ।

Colophon :

चयनोपस्थान समाप्तम् ॥

No 1135. सावित्रम्
SĀVITRAM

Pages, *15* *Lines*, *7 on a page*

Begins on fol 99*a* of the MS described under No 1035

Complete

This is also a work on Agnicayana

Beginning

सावित्र स्वर्गकामश्चिन्वीत । पशुबन्धैश्चीयते। पशुबन्ध मात्मन्यरण्योर्वाग्निं समारोप्य यागदेश गत्वा उद्धृत्यावोक्ष्यायतने निधायोपावरुह्य विद्युदसि मि

End

वाजिना भक्षो अवत्थिति भक्षणमन्त्र । हविश्शेषभक्षणादि इद् हविरिति यजमानभाग(ग) प्राशनम् । यज्ञो बभूव यज्ञश्च मे वर्जं ब्राह्मणतर्पणान्तम् ॥

Colophon

सावित्रं पर्याप्तम् ॥

No 1136 चयनानुक्रमणिका
CAYANANUKRAMANIKĀ

Pages, *50* *Lines*, *6 on a page*

Begins on fol 33*a* of the MS described under No 1076 This leaf is, however, wrongly numbered as 25

Complete

This gives the order of the Mantras to be recited and of the rites to be performed in a Cayana ritual

Beginning is wanting

Beginning

सजूरृतुभिस्सजूर्विधाभिस्सजूरादित्यै सजूर्देवैर्वै मिह त्वा तया । सजूरृतुभि सजूर्विधाभि सजूर्विश्वैर्देवै सजूर्देवैर्वयो

मिह त्वा तया । सजूरृतुभिस्सजूर्विधाभिस्सजूर्देवैस्सजूर्देवैर्वयो मिह त्वा तया । पश्चर्तव्या आश्विनीरनूपदधाति । प्राण मे पाहि तया ।

End

अथ सायमग्निहोत्र जुहोति काले प्रातर्होम सन्तिष्ठतेऽग्नि । आग्निं चित्वा सौत्रामण्या यजेत । अपरेद्युर्वा मैत्रावरुण्यामिक्षा च ॥

Colophon

चयनानुक्रमणिका समाप्त (प्ता) ॥

No 1137 सोमहौत्रम्

SOMAHAUTRAM

Substance, palm leaf Size, 11 × 1¼ inches Pages, 203 Lines, 6 on a page Character, Grantha Condition, injured Appearance, old

This codex contains also 6 pages of Ādhānaprayōga, which begins on fol 103*a*, wrongly numbered as 106 It is fragmentary

Incomplete

This contains directions for the sacrificial priest, known as Hōtr, in respect of the performance of Sōma sacrifices

Beginning

सोमस्य प्रयोग सोमप्रवाकेन क्रियते । तदा सोमप्रवाक पृच्छेत् को यज्ञ क ऋत्विज का दक्षिणा अग्निर्मे(र्मे इ)ति वृतो होता महम्मे वोचो भर्गो मे वोचो यशो मे वोचस्स्तोमम्मे वोच क्लृप्तिम्मे वोचो भुक्तिम्मे वोचस्सर्वम्मे वोचस्तम्मा(न्मा)वतु तम्मा(न्मा) विशतु तेन भुक्षिषीय इति जपित्वा अग्निष्टे होता स नेति हौत्रमभ्युपगच्छेत् । मधुपर्क विष्टर पाद्यमर्घ्यमाचमनीय, मधुपर्क गौर्विष्टरो विष्टर इति यजमानेनोक्ते, होता—अह वर्ष्म सजाताना विद्युतामिव सूर्य इदन्त्वमसि (धि)तिष्ठामि यो मा कश्चाभिदा(स)ति इत्युदगग्रे विष्टृ(ष्टर) उपविशेत् । पाद्यमिति त्रि. पादप्र

क्षालनम् अर्घ्यमिति त्रि प्रतिगृह्य प्रोक्ष्य आचमनीयमिति त्रि अपामेकदेश हस्तेन गृहीत्वा अमृतोपस्तरणमसीति पिबेत्

End

स्वेषु क्षयेषु वाजिनोम् । यज्ञेन यज्ञमयजन्त देवा । तानि धर्माणि प्रथमान्यासन् । ते ह नाक महिमानस्सचन्त(न्ते) यत्र पूर्वे साध्या स्सन्ति देवों त्रि ॥

No 1138 सोमहौत्रप्रयोग

SŌMAHAUTRAPRAYŌGAH

Substance, palm leaf Size, 14½ × 1⅜ inches Pages, 93 Lines, 8 on a page Character Grantha. Condition, slightly injured Appearance, old

Incomplete

This is a work like the last with a few variations in reading

---

No 1139 सोमहौत्रम्

SŌMAHAUTRAM

Substance, palm leaf Size, 16⅜ × 1½ inches Pages, 113 Lines, 5 on a page Character, Telugu Condition, good Appearance, old

Complete

A work similar to the last

Beginning:

अथैतस्या रात्रेर्विवासकाले प्राग्वयसां प्रवादात्प्रातरनुवाकायामन्वित वाग्यत तीर्थेन प्रसाद्य सवनीयस्य पशोस्सप्तदश सामिधेन्य । वार्त्रघ्ना-वाज्यभागौ अग्नि पशुदेवता वनस्पति पृषदाज्यदेवता इन्द्रो वसु-मान् प्रातस्सवनदेवता

End

अथाश्वेत्यादि हुत्वा ओं च मे स्वरश्च मे यज्ञोपाचिते नमश्च यचेस्यो(न्यू)न तस्मै त उपयचेऽतिरिक्त तस्मै ते नम ॥

Colophon

सोमहौत्र सम्पूर्णम् ॥

युवाब्दे मार्गशीर्षे च शुक्लपक्षे द्वितीयके ।
स्थिरवासरसयुक्ते सोमहौत्र लिखेदहम् ॥(?)

No 1140 सोमहौत्रप्रयोग

SŌMAHAUTRAPRAYŌGAH

Pages, 151 Lines, 16 on a page

This is simply a copy of the MS described under No 1137, made in 1895 This begins on fol 113*a* of the MS described under No 1058

On fol 188*b* begins a work called Ādhānaprayōga extending over 5 pages As the MS is fragmentary, no extract is given

---

No 1141 पौण्डरीकहौत्रम्

PAUNDARĪKAHAUTRAM

Substance, palm leaf Size, 17⅜ × 1⅜ inches Pages, 233 Lines, 6 on a page Character, Telugu Condition, good Appearance, old

Contains the हौत्रशस्त्रसूक्त used in the Pauṇḍarīka sacrifice

Begins on fol 1*a* The other work herein is Ṛgvēdāruṇānukramaṇikā 118*a*

Beginning

उपप्रयन्तो अध्वर—ग्नये । आरे—ण्वतोम् । य स्त्री—ष्टिषु । अरगयोम् । उत—जनि । धनम्—रणोम् । यस्य— तये ।

* * * *

स त्वमग्ने, सौभगत्वस्य विद्वा नस्माकमायु प्र तिरेह देवोम् । तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धु पृथिवी उत द्योम् ॥

पौण्डरीकहौत्रशस्त्रसूक्तानि समाप्तानि ॥

यस्सत्राह(।) विश्वचर्षणी(णे)रिन्द्रन्त हूमहे वयम् । सहस्रमुष्म(ष्क)तु- विनृम्ण सत्पते भवा समत्सु नो वृधोम् । बाधसे जनान्वृषभेव मन्युना घृषौ मिल्ह[।] ऋचीषम

End

अध्वर्युणाहृतमुक्थ्यपात्रमुपहूय भक्षयति । वाग्देवी सोमस्य तृप्यतु । सोमो मे राजायु प्राणाय वर्षतु । स मे प्राणस्सर्वमायुर्दुहा महत् । तूष्णीमुत्तर भक्षयित्वा । आत्माभिमर्शन कृत्वा । सन्तिष्ठते निष्कैव- ल्यम् ॥

Colophon

बृहतीसहस्र समाप्तम् ॥

No 1142 इष्टिहौत्रम्

IṢTIHAUTRAM

Pages, 19 Lines, 7 on a page

Begins on fol 60*a* of the MS described under No 929

Complete

A work similar to the last in respect of subject-matter.

Beginning

अस्या इष्टे पञ्चदश सामिधेन्य । वार्त्रघ्नावाज्यभागौ । अग्निर्विष्णु रग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवता इति पौर्णमास्या, वृधन्वन्तावाज्य भागौ । अग्निर्महेन्द्रश्च प्रधानदेवते इत्यमावास्यायाम् । स्विष्टकृत्प्रयाजा दयोऽङ्गदेवता ।

End

अग्निर्विद्वान् स यजात् सेदु होता सो अध्वरान् स ऋतून् कल्पयाति वौषट् ॥

Colophon

इष्टिहौत्र समाप्तम् ॥

No 1143 होतृप्रयोग

HŌTṚPRAYŌGAḤ

Substance, palm leaf Size, 14½ × 1½ inches Pages, 53 Lines, 8 on a page Character, Grantha Condition, good Appearance, old

Begins on fol 46a. The other works herein are Umāmahēsvarapūja 1a, Āsvinasahasram 3a Contains directions for the Hōtṛ priest in connection with the sacrifices—Sarvapṛsthāptōryāma (46a) and Ukthya (61a)

Beginning

अथ सर्वस्तोमस्य सर्वपृष्ठाप्तोर्यामस्य होतृप्रयोग उच्यते । दीक्षि(क्ष)णीयाद्यग्नीषोमीयान्त प्रकृतिवत् । सवनीये विशेष सवनीयानां पशूनां सप्तदश सामिधेन्य । वा गौ । अग्निस्सरस्वती सोम पूषा बृहस्पतिर्विश्वे देवा इन्द्रो मरुत इन्द्राग्नी सविता वरुणश्च पशुदेवता. ।

* * * *

उक्थ्यस्य होतृप्रयोग । को यज्ञ इत्यादि । न प्रवर्ग्य सवनीयपशुरैन्द्राग्नवत् । न दधिघर्मम् । आग्निमारुतान्तमग्निष्टोमवत् ।

End

पिबास्यन्धो मदायावौ सोमस्याग्ने वीहि वौ ॥

Colophon

होतुरुत्तमपर्यायस्समाप्त ॥

No 1144 दर्शपूर्णमासेष्टिहौत्रम्

DARŚAPŪRNAMĀSĒṢṬIHAUTRAM

Size, 16¾ × 1½ inches Pages, 40 Lines, 5 on a page

Begins on fol 1a of the MS described under No 1101

Complete

Ritualistic directions for the Hōtṛ priest in relation to the Darśapurṇamāsa sacrifice

Beginning

होतरेहीत्युक्तेऽध्वर्यु । होता—अस्या इष्टे पञ्चदश सामिधेन्य । वार्त्रघ्नावाज्यभागौ । अग्निश्च सोमश्च आज्यभागदेवते । अग्निर्विष्णुरग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवता ।

End

स्वाहेति समिधमाधाय ओंच मे स्वरश्च मे यज्ञोपच(चि)ते नम (श्च) यत्ते न्यून तस्मै त उपयत्तेऽतिरिक्त तस्मै ते नम । इत्याहवनीयमुपस्थाय

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नम ॥
इति नमस्कृत्य यथासुख गच्छेत् ॥

Colophon

दर्शपौर्णमासेष्टिहौत्र समाप्तम् ॥

No 1145. सोमौद्गात्रम्

SŌMAUDGĀTRAM

Substance, palm leaf Size, 14¾ × 1½ inches Pages, 112 Lines, 5 on a page Character, Telugu Condition, good Appearance, old

Complete

The other works herein are Vājapēyasāmani 57a, and Aparasūtram 64a

A set of rules for the guidance of the Udgatṛ priest in the conduct of Sōma sacrifices

Beginning

यज्ञेश्वरशर्मणस्सोमो भविष्यति तत्रभवतौद्गात्र कर्तव्यम् । आधानादिषु कर्मसु क ऋत्विज ? श्रीरामशर्मादय । के याजयन्ति ? ते चान्ये च । कच्चिन्नाहीन ? नाहीनो ज्योतिष्टोमोऽग्निष्टोमस्सोम । कच्चिन्न न्यस्तमार्त्विज्यम् ? न न्यस्तमार्त्विज्यम् । कच्चित्कल्याण्यो दक्षिणा ? सन्ति कल्याण्यो दक्षिणास्सुरूपा बहुपणमूल्या एकविंशतिर्गाव । अथ जपति

End

उदवसानीयास्थाने पूर्णाहुतिकाले अपरेण गार्हपत्यमुपविश्य उद्वंशीयस्य साम्न उद्वंश ऋषि अनुष्टुप्छन्द इन्द्रो देवता । गायन्ति त्वा गायत्रेणेति तृच गायेत् ॥

No 1146 औद्गात्रप्रयोग

AUDGĀTRAPRAYŌGAH

Pages, 188 Lines, 20 on a page

Begins on fol 82*a* of the MS described under No 42

A work similar to the last in subject-matter

The list of the contents of the work found herein is given below

Beginning

अत्यग्निष्टोमस्य सर्वमग्निष्टोमवत् । यज्ञायज्ञीयान्ते षोडशिसामस्तवनम् । विश्वरूपाज्योतिर्गानयोर्निवृत्ति । धुरा च निवृत्ति । सातीसासुव इडा वागिति पञ्चनिधनाना च निवृत्ति । आ नो मित्रावरुणेतिवत् स्तवनम् । रेतस्यारथन्तर-(व)र्णेप्रकृतिवत् । अग्निष्टोमन्चमसभक्षणानन्तरमुद्गाता यस्मान्न जात इति षोडशिग्रहमवेक्षेत यस्मान्न जात परो अन्यो अस्ति । य आ विवेश भुवनानि विश्वा । प्रजापति प्रजया सविदान । त्रीणि ज्योतीꣳषि सचेत (चते) स षोडशी । इति षोडशिग्रहमवेक्ष्य स्वासनमुपविशति ।

End

अग्ने सुखि(ख)तमे र (थे)देवां ईडित आवह । आसि होता मनुहित । सुष(स)मिद्ध इति चतुर् ऋचे मधुमन्तन्नराशसमिति ऋग्द्वयमस्ति। सुष(स)मिद्ध इति अत्रिवसिष्ठशुनककण्वसङ्कृतिवाद्रिय (श्यू) श्वाना तानूनपातिं नाराशसिमन्ये-षामिति सूत्रकारेणोक्तम् ८ गर्भोणा गर्भिणा च गायत्रीच्छन्द । पुष्कल ऋषि । अग्निर्मित्र[ा] इन्द्राग्नी देवता । गर्भोणा गर्भिणा च इमे वै लोका इति गायत्रब्राह्मण बहिष्पवमानाज्याना स तु वै यज्ञेन यजेत इति २ मय सोम २ बहि ।

औद्गात्रप्रयोग ॥

अत्यग्निष्टोम ॥	१६३
उक्थ्यक्रतु ॥	१६५
षोडशी ॥	१६९
सम्थावाजपेय. ॥	१७०
क्रत्वन्तरवाजपेय ॥	१७०
चयनप्रयोग ॥	१८५
तुलारोहणप्रयोग ॥	१९६.
पौण्डरीकसामानि ॥	१९९
सर्वतोमुखोत्तरद्वारम् ॥	२०७
चयनविकृति ॥	२१२
बहिष्पवमानऋच ॥	२१४
द्विविधज्योतिष्टोम ॥	२१६
पौण्डरीकसामानि ॥	२१९
व्यूढपौण्डरीकप्रयोग ॥	२२३
पौण्डरीकशङ्कुक्रम ॥	२२५
पौण्डरीकलघुपक्ष	२२६
समूढपौण्डरीकसङ्कल्प ॥	२२७

No 1147. दर्शपूर्णमासयाजमानप्रयोग

DARŚAPŪRNAMĀSAYĀJAMANAPRAYŌGAH

Pages, 14 Lines, 6 on a page

Begins on fol 58*a* of the MS described under No 1111

The rules for the guidance of the Yajamāna in the Darśapūrnamāsa sacrifices as described in the 4th Praśna of Āpastamba's Śrauta-Sūtra

Beginning.

अथ याजमानम्—

आहवनीयेऽन्वाधीयमानेऽग्निं गृह्णामि वसून् इमा . मयि । अन्तराग्नी तिष्ठन् जपति अन्तराग्नीत्येकया। इह प्रजा इह पशव इति द्वाभ्यां गार्हपत्यम्

End

प्राचो विष्णुक्रमान् क्रामति प्राङ्देत्य गोमतीज्ञपति जपति ॥

Colophon.

इति श्रीमत्यापस्तम्बसूत्रे तुरीय प्रश्न ॥

No 1148 मैत्रावरुणप्रयोग

MAITRĀVARUNAPRAYŌGAH

Pages, 68 Lines, 6 on a page

Begins on fol 1*a* which is wrongly numbered as 20 in the MS described under No 1111

The 11th leaf is numbered wrongly as 45, and the succeeding leaves continue the numbering from the 45th

The work under notice contains directions intended for the Maitrāvaruna in the following sacrifices —Paśubandha 1*a*, Ukthya 11*a*, Āptōryāma 22*a*, Sarvapṛṣtha 26*a*

Beginning

राजान ईशतोम् । प्रतिवाःसूर उदिते मित्र गृणीषे वरुणम् अर्यमण री(रि)शादसोम्। राया हिरण्यया मतिरीयमवकाय शवस्ये(से) ।

End

इष ज नव्यम्। धी(धि)या स्याम रथ्यस्सदासोम्। त्रि । उक्थ वाची न्द्रा(य)उशन्नुषण इति याज्या ॥

No 1149 वाजपेयसामानि

VĀJAPĒYASĀMANI

Pages, 14 Lines, 7 on a page

Begins on fol. 57*a* of the MS described under No 1145

Those Sūktas from the Sāma-Vēda which are chanted in the Vājapēya sacrifice,

Beginning

देवस्थानम्

हाँ च उपरीतों षा इ । चता सुतांसुतां । हो क इ । त्रि । हा च उवा लि । स क होनर । सोंडैमों यया उ शिचामं हावा इ । होइ । सत्यमोज । दचौधन्वांयोंनयों आ हों इ । स्वक ज्योंति ।

End

वारवन्तीयस्य ककुबुत्तराकारपक्षे गानप्रकारमाह । हिं । तुचो वन्नश्वा औ हो हा इ । स्ता ।

* * * *

ओंचोर्देवां । ना घा इहारां सा । हा । औं इइ । औंतौठौहो । चाति । एपाहायाहा होताइ । द्रा । पाप सर्वे ॥

No 1150 ब्रह्मत्वदीपिका

BRAHMATVADĪPIKA

Pages, 50 Lines, 8 on a page

Begins on fol 146*a* of the MS described under No 1051

Incomplete

A work giving the ritualistic directions to the Brahman priest in conducting sacrifices

Beginning

वाणीं गणेशं वागीशं गिरिशं चाण्डिकेश्वरम् ।
गिरिजामिन्दिरां गङ्गां प्रणम्य

* * * *

वृत्तिं नारायणेरिताम् ।
दृष्ट्वा तदनुसारेण ब्रह्मकर्मोच्यते ।

प्रथमं दर्शपूर्णमासयोरुच्यते — अथ ब्रह्माणं त्वां वृणीमह इति यजमानेनवृ[णी]तो भूत्वा वृतोऽसि करिष्यामीति सङ्कल्प्य.

End

तदा वैश्वानरेष्टिं पूर्णाहुतिं वा जुहुयात् । यदि पवित्र नश्येत् अग्नये पवित्रवत इष्टिं पूर्णाहुतिं वा जुहुयात् ।

Colophon

इति ब्रह्मत्वदीपिकाया प्रायश्चित्तानि समाप्तानि ॥

No 1151 अवभृथतन्त्रम्

AVABHṚTHATANTRAM

Pages, 14 Lines, 7 on a page

Begins on fol 88a of the MS described under No 1035

Incomplete

Gives the concluding rites of sacrifices

Beginning

अवभृथस्य तन्त्र प्रक्रमयति । या जाता इति परिस्तरण तूष्णीं परिभोजनीमुलपराजीं च । नेध्म वेदिं कृत्वोपचेष । समूहन्ति परिस्तृणीत देवा देवेषु कर्मणे वामित्यादि । एककपाल स्फ्यश्च द्वन्द्वम् इतराणि प्रकृतिवत् अन्वाहार्यस्थालीवर्जम् ।

End

एता आदिक्षालनान्त मैत्रावरुणदोहनम् ।
तप्ते दधि च लौकिक्या तूष्णीं स्फ्य सदस पुरा ॥

प्रैषोऽनिध्मो ध्रुवा प्राश्चा प्रोक्षो वेद्यास्तरस्य च ॥

अन्तर्वेद्याद्यय प्राण(I)स्तर दत्वाददीत च ।

No 1152 अग्निष्टोमावभृथप्रयोग

AGNIṢṬŌMĀVABHṚTHAPRAYŌGAḤ

Pages, 9 Lines, 7 on a page

Begins on fol 74a of the MS described under No 1120

Complete

The work is named पैर्णिमासीतन्त्र in the margin of fol 74

This Prayōga follows the Śrautasutra of Āpastamba in which the subject is treated in Khaṇḍas 10 to 25 in the 15th Praśna

A work similar to the last, with special reference to the Agniṣṭōma-sacrifice

Beginning

अवभृथस्य तन्त्र प्रक्रमयति । या जाता ओषधय इत्यादि तूष्णीं परिभोजनिमुलुपराजिश्च । नेध्म वेदिकरणमुपवेषश्च अलङ्कृत्य परिस्तरण देवा देवेषु कर्मणे वामित्यादिपात्रप्रयोगकाले एककपाल स्फ्यश्च (श्र)द्वन्द्व प्रणीता प्राशित्रमिडापात्रान्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् ।

End

तमग्निं परित्यज्य सङ्कल्पङ्करोति सायमग्निहोत्रम् मि । अध्वर्युर्धृष्टाधानादि सादयेत् । मार्जनान्तम् । काले प्रातर्होमं सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोम ॥

No 1153 आप्रिया

ĀPRIYĀ

Pages, 8 Lines, 9 on a page.

Begins on fol 82a of the MS. described under No 1085

Complete.

Contains some Sūktas or hymns in praise of Vēdic dieties, which are recited during a sacrifice They are called Prayājayājyas and are different for the different Gōtras

Beginning

कण्वाङ्गिरोऽगस्त्यशुनकविश्वामित्रोऽत्रिरेव च ।
वासिष्ठ कश्यपा वाध्यूजमदग्निर्यथाक्रमम् ॥

ये यजामहे सुसमिद्धो न आवह देवा अग्ने हविष्मते। होत, पावक यक्षि च वौ ॥ १ ॥

मधुमन्त तनूनपाद्यज्ञ देवेषु न कवे। अद्या कृणुहि वीतये।

End

अग्ने वह वरुणमिष्ट येन इन्द्रान्दिवो मरुतो अन्तरिक्षात् ।
सीदन्तु बर्हिर्विश्व आ(य)जत्रा स्वाहा देवा अमृता मादयन्ताम् ॥

No 1154. अरण्याधानम्
ARANYĀDHĀNAM

Pages, 8 Lines, 7 on a page

Begins on fol 102*a* of the MS described under No 1051

Incomplete.

The ritual relating to the preparation of the wooden cup Arani for obtaining fire by friction

Beginning

यद्यग्निहोत्रे होमस्य करणे न शक्नुयात् तदा प्रातर्होमं समाप्य अरणि आधाय गार्हपत्य प्रदीप्य होमकरणाशक्तौ निमित्ताद्या वि(म)थ्यं-मानमग्निमरण्यारोपण करिष्ये इति सङ्कल्प्य अ(य) ते योनिर्ऋत्विजो यत इति

End

पिण्डपितृयज्ञोऽपि विच्छिन्नस्स्यात्तदा पिण्डपितृयज्ञसङ्कल्पात् पूर्वं पिण्डपितृयज्ञलोपप्रायश्चित्तार्थं सप्तहोतारं होष्यामीति सकल्प्य महा-हविर्होतेत्याहवनीयेन ग्रहान् हुत्वा यथापूर्वं कुर्यात् ॥

No 1155 यज्ञविधि

YAJÑAVIDHIH

Pages, 85 Lines, 5 on a page

Begins on fol 162*a* of the MS described under No 1116

Complete

Certain rituals relating to sacrifices are dealt with herein

Beginning

अथातो यज्ञविधिं व्याख्यास्यामो यजमानस्याग्निर्मे होतेति देव मृत्विग्वरणमथ मानुषाणा ज्योतिष्टोमेनाग्निष्टोमसस्थेन रथन्तरपृष्ठेन गवा द्वादशशतदक्षिणेनाह(वनी)यस्यते(स्यान्ते) तत्रभवता अ(औ)द्गात्र कर्तव्य-मित्युक्ते क ऋत्विज के याजयान्ति ।

End

इष्टौ तत्स्थानीयाया पूर्णाहुतावपरेण गार्हपत्यमुपविश्य गायन्ति त्वेत्युद्दशीय तृचे गायेदनुष्टुब्विश्वे देवा ॥

Colophon

यज्ञविधिस्समाप्त ॥

No 1156 महावालभित्

MAHĀVALABHIT

Pages, 48 Lines, 6 on a page

Begins on fol 35*a* of the MS described under No. 1111

Incomplete

This is a hymn which is chanted in certain sacrifices

Beginning ·

हीं भूर्भुवस्वरोमध्वर्यो शोशो॰ूसा वो मे ह्यू ष्टु ब्रवा गिर ।
पाभि भोम् । त्रि यत्र क च त्तरम् ।

End

इत ऊर्द्धम् औण्ड्यन्यस्यापि समानम् ।

प्रति ते दस्यवे प्रकाराधो अदश्य हृदय द्यौर्न प्राथिनाशवोम् ।
दशमस्य पौतक्रन(व)स्सहस्रादस्याववृक ।

नित्याद्रायो अमहतोम् । शतम्मे गर्दभाना शतमूर्णावतीना शत
दासाम् अतिसृजोम् ॥

No 1157 सर्वतोमुखाप्तोर्यामऋषिच्छन्दोदेवता

SARVATŌMUKHĀPTŌRYAMA-ṚṢICCHANDŌDĒVATĀ.

Pages, 14 Lines, 8 on a page

Begins on fols 190*a* and 196*a* of the MS described under No 1110

Contains the names of the Ṛṣis, of the metres and of the deities connected with the hymns used in the conduct of the sacrifices known as Sarvatōmukha and Aptōryāma

The latter is complete

Beginning

अथ बहिष्पवमानस्य नवानामृचां गायत्री छन्द । पुष्कल ऋषि ।
सोमो देवता । इमे वै लोका गायत्रमिति

* * * *

नस्य विधायकब्राह्मणम् । मनोहिङ्कार इत्युद्गाथोपासकस्य सर्वं पृथि
व्यन्तरिक्ष द्यौ सर्वा दिश इति

ध्येयानि । अग्नेरुद्गीथो निरुक्त प्रजापते निरुक्त सोमस्य
मृदु श्लक्ष्णं वायो श्लक्ष्ण बलवदिन्द्रस्य क्रौञ्च बृहस्पते ।

End·

अन्धोदस इत्युद्वद्भार्गवस्य । जगती छन्द । भृगुऋषि । सोमो देवता । गायन्ति त्वेत्युद्वशीयस्य अनुष्टुप् छन्द । विश्वे देवा ऋषय । आग्निर्देवता

No 1158 आश्विनसहस्रम्

AŚVINASAHASRAM

Pages, 86 Lines, 9 on a page

Begins on fol 3a of the MS described under No 1148

Complete

Sūktas in praise of the Aśvins, &c, intended to be recited in sacrifices

Beginning

संस्थितेष्वाश्विनाय स्तुवते शसिष्यन् विसस्थितसश्चरेण निष्क्रम्याग्नीध्रीये जान्वाच्याहुतीर्जुहुयात् । अग्निरजिम गायत्रेण छन्दसा तमश्यान्तमन्वारभे । तस्मै मामवतु तस्मै स्वाहा । अग्नये

End

एवा नो अश्व समना समानानुशन्नग्न उशतो यक्षि देवान्वौ । सोमस्याग्ने वीहि वौ । गृह आश्विनश्चेत् युवन्देया ऋतुना यदि नाधीयात् पुराणमोक सख्य शिव वाम् । इति ॥

No 1159 क्रतुप्रायश्चित्तम्

KRATUPRĀYAŚCITTAM

Pages, 16 Lines, 5 on a page

Begins on fol 1a of the MS described under No 1116

Complete

Expiatory rites for remedying errors of commission or omission in the conduct of sacrifices

Beginning

प्रायश्चित्तान्युच्यन्ते । प्रथम तावत् प्रस्तोता परिसामानि स्खलनं चेत्तदा पुनर्गीत्वा महाव्याहृतीर्जुहुयात् । विशेषस्तु इत्थञ्चसाम्ना भ्रेष विष्णवर्चे(ण्वृचे)न जुहुयात् । प्रस्तोता प्रवर्ग्योद्वासनात् पूर्वं यानि प्रायश्चित्तानि भवन्ति तानि सर्वाणि प्राग्वशे आहवनीये जुहुयात् । तत ऊर्ध्वमुत्तरवेद्यग्नौ सर्वे यजुर्मन्त्राणा विघ्ने सति तत् पुनर्जपित्वा महाव्याहृतीर्जपेयु ।

End

ज्योतिष्टोमेन तत् सम्पन्नम् । ससबृहत्या यो(ये) माध्यन्दिनादतिरिच्यन्ते तावत्तृतीयसवनाल्लुप्यते । तत् सपन्नम् । तृतीयसवनादतिरिक्ता विष्णोश्शिपिविष्टवतीषु बृहता स्तुयु । त्रिवृता स्तोमेनोपरिष्टात् सन्धे ॥

Colophon

इति क्रतुप्रायश्चित्तम् ॥

No 1160. आश्वलायनगृह्यसूत्रम्

ĀŚVALĀYANAGṚHYASŪTRAM

Substance, palm-leaf Size, 13⅞ × 1¼ inches Pages, 72 Lines, 6 on a page Character, Nandinägari Condition, good Appearance, old

Begins on fol 1a The other work herein is Āsvalāyanagṛhyapariśiṣṭa 37a

Contains 4 Adhyāyas

The rites to be performed by the householder with the household fire are described and explained herein as they appertain to the Ṛgvēdins

Beginning

उक्तानि वैतानिंकानि गृह्याणि वक्ष्याम । त्रय पाकयज्ञा हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुता । अथाप्यृच उदाहृ-

रन्ति यस्समिधा य आहुतीर्योवेदेनेति । समिधमेवापि श्रद्धान आद्-
दन्मन्येत यज इदमिति नमस्तस्मै य आहुत्या यो वेदेनेति विद्यै-
वाप्यस्ति प्रीतिस्तदेतत् पश्यन् ऋषिरुवाच ।

End

बर्हिराज्य चानुप्रहृत्य प्रतिधूम गाव आनयेत् । शान्तातीय_
जपन् पशूना मध्यमियान्मध्यमियात् । नमश्शौनकाय नमश्शौनकाय नम
परमऋषिभ्यो नम परमऋषिभ्य ॥

Colophon

समासस्तुरीयाध्याय ॥

No 1161 आश्वलायनगृह्यसूत्रम्
ĀŚVALĀYANAGṚHYASŪTRĀM

Substance, palm leaf Size, 13 × 1¼ inches Pages, 11, Lines 9 on a page Character, Grantha Condition, good Appearance, new

Contains the 2nd Adhyāya, and 6 Khaṇḍas of the 3rd Adhyāya

No 1162 आश्वलायनगृह्यपरिशिष्टम्
ĀŚVALĀYANAGṚHYAPARIŚIṢṬAM

Pages, 98 Lines, 5 on a page

Begins on fol. 37*a* of the MS described under No 1160

Contains two Adhyāyas A supplement to the last described work

Beginning

अथास्मिन्नाश्वलायनगृह्ये यानि का नि चिदन्यत्रोक्तानिही(नीहे)च्छता
चार्येणानुमतानि ज्ञापितानि यानि प्रोक्तप्रदर्शितक्रियाणि तानि सर्वाण्यव-
बोधाय यथावदभिधास्याम —कर्ता स्नातो धौतानार्द्रवासा यज्ञोप-
वीत्याचान्त प्राङ्मुख आसीनो दक्षिणाङ्कक(।)री समाहितो मन्त्रान्ते कर्म
कुर्वीत.

End

अथ पितॄणा ततो मातामहानामिति त्रितयच्छिन्ति। तस्माज्जीव-पि(त्पि)ता सुतसस्कारेषु मातृमातामहयो कुर्यात्तस्याश्च जीवत्या मातामहस्य कुर्यात् कुर्यात् ॥ २६ ॥ अथ पितृमेध अथाभ्युदयिके अथ ब्राह्मणाना चमयेत् ॥

* * * *

भगवन् केतो। भगवन् राहो। भगवन् शनैश्चर। भगवन् भार्गव। भगवन् बृहस्पते। भगवन् सौम्य सौम्याकृते। भगवन्नङ्गारकाग्न्याकृते। भगवन् सोम। भगवन्नादित्य। अथावाहनमन्त्र। अथार्चनमाचार्य। अथार्चनाङ्गानि। अथास्य सभारा। अथ ग्रहयज्ञ। अथ ग्रहयज्ञो भगवन्‌रा नैश्चराथहविरर्हात्षट्क (?)॥

Colophon

इत्याश्वलायनगृह्यपरिशिष्टे द्वितीयोऽध्याय ॥

No **1163** आश्वलायनगृह्यकारिका

ĀŚVALĀYANAGṚHYAKĀRIKĀ.

Substance, paper Size, 8 × 6⅜ inches Pages, 138 Lines, 20 on a page Character, Telugu (very neatly written) Appearance, new Copied for the Library in 1894

This is a Kārikā by Śākala *Vide* Dr Burnell's Catalogue of the Palace Library at Tanjore, page 14, for contents and remarks

Beginning

शाकलोऽहं प्रयोगञ्च वक्ष्ये बह्वृचकर्मणा।
कारिकायामनुक्त यत्र(त्त)देव हि समन्त्रकम् ॥
आचार्यस्य च वै यावत्सक्त(त्क)र्माध्वप्रदर्शिनी।
प्रोच्यते कारिकेतीह सद्भिश्चैव तु लौकिके ॥

अपानपाणिपादस्य शोधन शुद्धिकारणम् ।
सर्वेषामपि वर्णानामिदमादौ प्रचक्षते ॥
पाद प्रक्षाल्येद्विप्र शौच एव हि दक्षिणम् ।
पश्चात्सव्यमथान्यत्र सव्यमादौ सदक्षिणम् ॥
सुस्नात कृतसन्ध्यस्तु शुचिर्भूत्वा समाहित ।
गृह्योक्तश्चारभेत्कर्म नित्यन्नैमित्तिकश्च हि ॥
सन्ध्याहीनो न तत्कुर्यात् प्राप्तश्चेत्सन्ध्ययोर्द्वयो ।
शुभ वाप्यशुभ कर्म कृतश्चेन्निष्फल भवेत् ॥
कृतसन्ध्योऽधिकारी स्यात् माङ्गल्ये मृतकेऽपि च ।
सन्ध्ययोरुभयोश्चैव नान्यथा कर्तुमर्हति ॥
पुत्रे जाते पिता कुर्याज्जातकर्म विधानत ।
न चेत्स्यात्सन्निधौ कर्ता कारयेन्नामकर्मणि ॥
नान्दीश्राद्ध पिता कुर्यात् स्वस्तिवाचनपूर्वकम् ।
आदौ चैव शुभार्थी तु सर्वसंस्कारकर्मणाम् ॥
बहूनां क्रियमाणानां सस्कार्यस्य च कर्मणाम् ।
नान्दीश्राद्ध भवेदेव तत्तत्कर्म भवेत्पृथक् ॥

End

ब्रह्महत्यादिक पाप ब्राह्मण कुरुते यदि ।
स दोषघातनिरत पतित परिकीर्तित ॥
प्रमादाच्चिद्र्वेदेक पृथक् देहं द्विजस्य तु ।
तच्चैवाप्सु क्षिपेदङ्गकरपादाङ्गुलादिकम् ॥
एवमूतस्य विप्रस्य मरणञ्जायते यदि ।
कुर्यात्तस्य सुत कर्म प्रायश्चित्तपुरस्सरम् ॥
तारयेच्च पितॄन् पापात्स एव तरति स्वयम् ।
इत्येवङ्कथितो धर्मश्शाकलेन महर्षिणा ॥

इति शाकलाचार्यकृतकारिकायामन्त्येष्टिप्रकरण समाप्तम् ॥

मातृपूर्वं भवेच्छ्राद्ध सुतसस्कारकर्मणि ।
तदेव पितृपूर्वं स्यादात्मसस्कारकर्मसु ॥

Colophon

इति शाकलकारिका सम्पूर्णा ॥

No 1164 आश्वलायनगृह्यकारिका

ĀŚVALĀYANAGṚHYAKĀRIKĀ

Substance, palm leaf Size, 16¼ × 1½ inches Pages, 56 Lines, 7 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 120*a* The other work herein is Dharmapravṛtti 1*a*

Contains 3 Adhyāyas in verse

The work is called Āśvalāyanagṛhyapradīpikā in the colophon The author of the work is mentioned as Bhaṭṭa Kumārilasvāmin

Beginning

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोग वच्मि सङ्क्षेपात् वृत्तिकारेण भाषितम् ॥
प्राणानायम्य सङ्कल्प्य परितस्थण्डिल शुचि ।
अधिक वेषुमात्र वा गोमयेनोपलिप्य च ॥
यज्ञिय शकल किञ्चिदादधीत तत परम् ।

End

गृहे स्नानं प्रशसन्ति स्नानमुष्णेन वारिणा ॥
मृते जन्मनि सङ्क्रान्ते श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥
पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमायान्तु नदीस्नान पुनात्यासप्तमङ्कुलम् ॥

इत्याश्वलायनगृह्यप्रदीपिकाया कारिकासु तृतियोऽध्याय ॥
शुभकृद्वत्सरे चैव ग्रीष्मर्तौ वृषभे रवौ ।
शुद्धे वै ज्येष्ठमासे तु द्वितीयायान्तिथाविथम् ॥
सौम्यवासरयुक्ताया लिखिता गृह्यदीपिका ॥
इमन्दिन्दुपुरीशाय कोसलेशाय धन्विने ।
सीतालक्ष्मणयुक्ताय मायातीताय ते नम ॥

No 1165 आश्वलायनगृह्यकारिका

AŚVALAYANAGṚHYAKARIKA

Substance, palm leaf Size, 16¼ × 1¼ inches Pages, 62 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

Same as the last

Contains Adhyāyas 1 to 4 In the beginning two leaves have been lost, and the first existing leaf finishes स्थालीपाकविधि and begins स्वस्तिवाचन

Begins on fol 1*a* The *other works herein are* Varamangalāṣṭakam 32*a*, Smṛtivacanāni 33*a*, Kākamaithunaśāntiḥ 36*a*, Mahōtpātaśāntiḥ 36*a*, Mṛtyuñjayamantraḥ 39*a*, Kapōtaśāntiḥ 45*b*, Kadalīśāntiḥ 46*a*, Utpalaśāntiḥ 46*b*, Śithilīśāntiḥ 48*a*, Amāvāsyāprasūtiśāntiḥ 49*b*, Mūlāślōṣaśaśāntiḥ 51*a*, Jyēṣṭhānakṣatraśāntiḥ 59*a*, Sadantajananaśāntiḥ 61*a*, Dantajananaśāntiḥ 62*a*, Sinīvalīśāntiḥ 62*b*, Kuhūśāntiḥ 63*a*, Grahaṇaśāntiḥ 65*a*, Gōmahiṣyādijananaśāntiḥ 66*a*, Ājyāvēkṣaṇalakṣaṇam 67*a*, Rajasvalāśāntiḥ 67*b*, Śrāddhabrāhmaṇādiniyamaḥ 72*a*

End:

ब्राह्मणान् भोजयित्वा तान् स्वस्तीति वचन वदेत् ।
गौ(गो)ण(फा)स्याहतवस्त्राणि कर्ता तेभ्यो ददात्यथ ॥

Colophon

इति आश्वलायनगृह्यकारिकासु चतुर्थोऽध्याय ॥

No 1166 आश्वलायनस्मार्तप्रदीपिका

ĀŚVALĀYANASMĀRTAPRADĪPIKA

Substance, plam leaf Size, 14¾ × 1½ inches Pages, 76 Lines, 9 on a page Character, Telugu Condition, injured Appearance, old

Contains the first two Adhyāyas The first Adhyāya consists of 25 and the second of 21 Khaṇḍas The total number of Khaṇḍas is 46 The number of Khaṇḍas in the MS described next is 42 The 8th, 22nd, 23rd 24th and 25th have no corresponding divisions in this latter codex

The *ritualistic procedure relating to the house hold rites* as observed by the followers of Aśvalayana sutra The author refers to Nārāyana, a commentator on this Sūtra

Beginning

अथाश्वलायनाना सुखावबोधाय नारायणीयादिग्रन्थानवलोक्य लक्ष्मी-नृसिंह नत्वा स्मार्तप्रदीपिकां वक्ष्ये—कर्ता स्नातो धौतानार्द्रवासा नैकवासा बद्धशिखो यज्ञोपवीत्याचान्त कृतनित्यक्रिय शुचौ देशे प्राङ्मुख आसीन कर्म कुर्यात् ॥

* * * *

इति स्मार्तप्रदीपिकाया प्रथमोऽध्याय ॥

End

अथास्य शिखे विमुश्चति, अथ होम , अथानयोरार्द्राक्षतारोपण, हिरण्य-गर्भस, ब्राह्म , आयुष्य वर्चस्यम्, अथ समावर्तनम् अथ समावर्तन विवाहव्रत एकादश ॥

No 1167 आश्वलायनस्मार्तप्रदीपिका

ĀŚVALĀYANASMĀRTAPRADĪPIKĀ

Substance, plam leaf Size, 12¾ × 1½ inches Pages, 92 Lines, 8 on a page Character, Telugu Condition, injured Appearance, old

Begins on fol 48*a*

The other works herein are Śabdarūpāvaliḥ 1*a*, Putrasvīkaraṇaprayōga 8*a*, Aśvalāyanaprayōgamantrāvaliḥ 9*a*, Upanayanamaṅgalāṣṭakam 94*a*, Lakṣmīpatimangalāṣṭakam 94*b*, Navagrahamaṅgalāṣṭakam 95*a*, Ṣōḍaśōpacāravidhiḥ 96*a*

Contains 42 Khaṇḍas The 11th and 12th Khaṇḍas are omitted

Beginning

Same as in the work described under the last No

End.

तमग्निं विसृज्य मानुषीं कन्या विधिना विवहेत् । पुत्रपौत्रवान् भवति ॥

कल्यान्वयप्रतीतेन कौशिकान्वयजन्मना ।
नृसिंहाख्येन लिखिता आश्वलायनदीपिका ॥
आश्वलायनसूत्रस्य दीपिकाख्य निबन्धनम् ।
प्रख्यातिमेतु सर्वत्र यावदाचन्द्रतारकम् ॥

कुल्यान्वयाम्भोधिसुधाकरस्य
नृसिंहपुत्रस्य दयान्वितस्य ।
नृसिंहनामार्यसुतो नृसिंह
विलिख्य सपादितमादरेण ॥

श्रीलक्ष्मीनृसिंहस्मार्तप्रदीपिकाया मन्त्रावल्याश्च पत्रसङ्ख्या षडशीतिः ॥

No 1168 जैमिनिगृह्यसूत्रम्

JAIMINIGṚHYASŪTRAM

Substance, paper Size, 11 × 8¾ inches Pages, 19 Lines, 16 on a page Character, Dēvanāgarī Condition, good Appearance, new Transcribed for the Library in 1897

Begins on fol 13*a* The other work herein is Jaiminigṛhyasūtrakārikā 1*a*

Refer to pages 2 and 70 of M Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS for the year 1896-97, No 1, Madras

---

No 1169 जैमिनिगृह्यसूत्रकारिका

JAIMINIGṚHYASŪTRAKĀRIKA

Pages, 25 Lines, 16 on a page Transcribed for the Library in 1897

Begins on fol 1*a* of the MS described under No 1168

Refer to pages 3 and 71 of M Seshagiri Sastri's Report on a Search *for* Sanskrit and Tamil MSS *for the year 1896-97*, No 1, Madras

---

No 1170 जैमिनिगृह्यसूत्रव्याख्या

JAIMINIGṚHYASŪTRAVYĀKHYĀ

Substance, *paper* Size, 11¼ × 9¾ inches *Pages*, 109 *Lines*, 17 on a page Character, Telugu Condition, good Appearance, new Transcribed for the Library in 1894

Contains the commentary of Śrīnivasa on the 1st Praśna of 25 Khaṇḍas and on 5 Khaṇḍas of the 2nd Praśna Thus 4 Khaṇḍas are wanting at the end

Refer to pages 7 and 150 of M Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS No 2, for the year 1893 94

No 1171 खादिरगृह्यसूत्रम्

KHĀDIRAGṚHYASŪTRAM

Pages, 9 Lines, 9 on a page

Begins on fol 10*a* of the MS described under No 63

Contains the first 11 Khaṇḍas of the Sūtra.

The work consists of 5 Paṭalas of which this codex contains Paṭalas 1 and 2, and 1 Khaṇḍa of the 3rd Paṭala This is the Gṛhya-sūtra adopted by the followers of Drāhyāyana-śrauta-sūtra

Beginning

अथातो गृह्या(ह्य)कर्माण्युदगयनपूर्वपक्ष पुण्याहेषु प्रागावर्तनादह्न का - लोऽनादेशे अपवर्गे यथोत्साह ब्राह्मणानाशयेत् । यज्ञोपवीत सौत्र कौश वा ग्रीवाया प्रतिमुच्य[ा] दक्षिण बाहुमुद्धृत्य यज्ञोपवीती भवति ।

End

भुवनमिति पुसेऽग्रे लोहितेनेत्यनुमन्त्रयेति तन्ति प्रसारितामियन्ती- दि(मि)ति ॥

Colophon

गृह्य समाप्तम् ॥

No 1172 खादिरगृह्यसूत्रम् (सवृत्ति)

KHĀDIRAGṚHYASŪTRAM WITH COMMENTARY

Pages, 92 Lines, 25 on a page

Begins on fol 57*a* of the MS described under No 1078

Contains the Sūtra of Khādirācārya, with the Vṛtti of Rudraskanda, son of Nārāyana, a resident of Makhavāṭa, on 4 Paṭalas

Complete

Beginning

अथातो गृह्यकर्माणि । अथ अनन्तर कस्मादनन्तरम् ² देवसवितरित्या- दिमन्त्रवच्छाखाध्ययनात् यतोऽनधीतवेदस्य मन्त्रापरिज्ञानात् वक्ष्यमाणेषु वाक्येषु कर्मानुष्ठानयोग्यतया प्रतिपत्तुमशक्यमतस्तदनन्तरमिति गम्यते ।

End:

सवत्सरमतीत्यागतान् पुनर्यज्ञविवाहयोश्च अर्वागपि सवत्सरादागता- नर्हयेत् ॥

द्विरुक्ति॰ पटलसमाप्त्यर्था ॥

नारायणस्य पुत्रेण मखवाटनिवासिना ।
रुद्रस्कन्देन सङ्क्षेपात् व्याख्यात गृह्यशासनम् ॥

Colophon

इति खादिराचार्यकृतगृह्य(स्य) रुद्रस्कन्दकृताया गृह्यवृत्तौ चतुर्थस्य पटलस्य चतुर्थ खण्ड ॥

गृह्यवृत्तिस्सपूर्णा ॥

No 1173 द्राह्यायणगृह्यपरिशिष्टम्

DRĀHYĀYANAGṚHYAPARIŚIṢṬAM

Substance, paper Size, 11 × 8½ inches Pages, 96 Lines, 14 on a page Character, Dēvanāgari Condition, good Appearance, new Transcribed for the Library in 1896

Complete

A supplement to the last described work

Beginning

अथातश्शौचविधिं व्याख्यास्याम । ग्रामाददूर गत्वा यज्ञोपवीतिं (त) शिरसि दक्षिणे कर्णे वा मृत्तिका गृह्णाति काष्ठमन्तर्धायोपविशेत् अहरुत्तरतो निशायां दक्षिणत उभयोस्सन्ध्ययोरुदङ्[च]मुखो ना न गोवृक्षमूलपर्वतमूले चतुष्पथेऽन्य[ा]गारे गवा गोष्ठे पुलिनवर्जे देवगृहे वल्मीके मूषिकस्थले प्रत्यग्नि प्रतिसूर्ये च प्रतिगृहं प्रतिब्राह्मणमित्याह भगवान् नारायणि

End:

मारुतमसि म[ा]रुतामोजोऽपद्धा(पान्धा)रा भिन्धि । अप॰ क्षिप्र विसर्जय विसर्जय पर्जन्य एहि एहि इन्द्र सदास्तु(सास्तु) वृष्टिं देहि पर्जन्य सद्यो वर्षधारा स्रावय स्रावयेति ॥

Colophon

पर्जन्यकल्पस्समाप्त॰ ॥

No 1174 बोधायनगृह्यसूत्रम्

BŌDHĀYANAGRHYASŪTRAM

Substance, paper Size, 12⅜ × 7⅜ inches Pages, 33 Lines, 40 on a page Character, Grantha Condition, good Appearance, new Purchased in 1894

Begins on fol 1*a*

The other works herein are Bōdhayanapitṛmēdhapraśnaḥ 17*b*, Pitṛmēdhaprayōgaratnamālā 26*a*, Bōdhāyanaparibhāṣā 28*a*, Bōdhāyanagṛhyataccheṣaḥ 35*a*

Contains the four Praśnas of the work

The Praśnas contain 16, 10, 11 and 12 Khaṇḍas respectively The second Praśna contains the Samāvartanamantrabrāhmana and the third the Avāntaradīkṣakalpa, though these are not actually included in the work

Beginning

य(अ)थो एतद्धुत प्रहुत आहुतश्शूलगवो बलिहरण प्रत्यवरोहणमष्टकाहोम इति सप्त पाकयज्ञसस्था इति । ता अनुव्याख्यास्याम.—तत्र यद्धूयते स हुतो यथैतद्विवाहस्सीमन्तोन्नयनश्चेति तत्र हि हूयत एव । अथ यद्धुत्वा दीयते स प्रहुतो यथैतदुपनयन समावर्तनश्चेति तत्र हि हुत्वा दीयत एव । अथ यद्धुत्वा दत्वा चादीयते स आहुतो यथैतदुपनयन समावर्तन चेति तत्र हि हुत्वा दत्वादीयते । अथ यच्छूलेषूपनक्षिप्य गव्यानि श्रपयन्ति स शूलगव ।

End

अथ यदि होमकालेषु, अथातस्सप्तपाकयज्ञानां प्रायश्चित्तम्, अथात प्रायश्चित्तानि, अथ विपरीतदर्भास्तरणम्, अथ गर्भाधानपुसवनम्, अथ पाकयज्ञाना प्रायश्चित्ति, अथाभ्याघात अथातस्सप्तपाकयज्ञानां यथर्तुसंवेशनादि, अथातस्सप्तपाकयज्ञाना द्वादश ॥

Colophon

इति चतुर्थ प्रश्न ॥

No 1175 बोधायनगृह्यतच्छेष

BŌDHĀYANAGṚHYATACCHĒṢAH

Pages, 5 Lines, 37 on a page Character, Grantha Copied in 1898

Begins on fol 35*a* of the MS described under No 1174

Contains Khaṇḍas 5 to 10

A supplement to the work described under the last number

Beginning

अथातस्सिकतादोष व्याख्यास्यामो भस्मकेशतुषकपालशर्करातृणास्थि- पिपीलि(ल)कैरार्द्रसि(सै)कतानि वर्जयेत् । भस्मना यजमानक्षय ,केशेन स्त्रीमरण, तुषेण पुत्रनाश , कपालैरर्थनाश , शर्करै(राभि)र्बन्धुवियोग , तृणेन कर्मक्षय , अस्थिना(स्था) ग्रामविनाश , पिपीलि(ल)कैराष्ट्रविनाश , आर्द्रसि(सै)कतैर्व्याधिभय भवतीत्याह भगवान् बोधायन ।

End

ईश्वर भास्कर विद्यात् स्कन्दमङ्गारक तथा ॥
शुक्र शचीपतिं विद्यादुमा चैव निशाकरम् ।
बुध नारायण विद्यात् ब्रह्माण च बृहस्पतिम् ॥
यम शनैश्चर विद्यादेव देवा यथा ग्रहा ।
देवता ग्रहरूपेण दर्शयन्ति शुभाशुभम् ॥

इत्याह भगवान् बोधायन ॥

No 1176 वैखानसगृह्यसूत्रम्

VAIKHĀNASAGṚHYASŪTRAM

Substance, paper Size, 8 × 6½ inches Pages, 205 Lines, 12 on a page Character, Telugu Condition, good. Appearance, new Transcribed for the Library in 1891

Begins on fol 1*a* The other works herein are Vaikhānasadharmasūtram 103*a*, and Vaikhānasapravarasūtram 135*a*

Contains 7 Praśnas

Refer to pages 6 and 155 of M Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS for the year 1893–94, No 2, for remarks and extracts

---

No 1177 वैखानसप्रवरसूत्रम्
VAIKHANASAPRAVARASŪTRAM

Pages, 13 Lines, 12 on a page

Begins on fol 135*a* of the MS described under No 1176

Transcribed for the Library in 1894

Vide the reference given under the last number

No 1178 शाठ्यायनसूत्रम्
ŚATHYAYANASŪTRAM

Substance, palm leaf Size, 18¾ × 1¼ inches Pages, 15 Lines, 6 on a page Character, Telugu Condition, injured Appearance, not old

This treats of the expiatory rites to be performed in relation to the various Gṛhya ceremonies

Beginning

अथातो गृह्यप्रायश्चित्तानि स्मर्यन्ते । तानि वक्ष्याम —शेषाणि वैतानिकानि स्यु होमदेवतयोस्समानाम्नातात्फलश्रुतेश्च । या एवाहिताग्नेर्देवतास्ता एवौपासने, य एवाहिताग्नेर्धर्म(?)स्त एवौपासनिकस्य, य एवाहिताग्नेर्लोक स एवौपासनिकस्येति शाठ्यायनिब्राह्मणम् ।

End

पत्नीबहुत्वेऽपि यदि ज्येष्ठा होमकालेऽन्यत्र वसति वान्यदितरे (?) वा तिष्ठति किं न होतव्यं हुतमप्यहुत यनि । किं कनिष्ठाया नाथ नियम इति जैमिनि । सदा स्वामिनोऽसन्निधौ होतव्यमिति तैत्तिरिस्तैत्तिरि ॥

Colophon

इति शाठ्याय(नसूत्र समाप्तम् ॥)

